CC-0. In Public Domain. Digitization by eGangotri

FJAB-04

फलितज्योतिषम्

आचार्यसेतुः, चतुर्थपत्रम्

मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

प्रश्नभूषणम्

खण्डः

३

विवाहादिप्रश्नविचारः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

FJAB-04

प्रश्नभूषणम्

फलितज्योतिषाचार्यसेतुः,
चतुर्थपत्रम्

खण्डः

३

विवाहादिप्रश्नविचारः

नवमः पाठः ०५-१७

दशमः पाठः १८-३३

एकादशः पाठः ३४-४६

द्वादशः पाठः ४७-५९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानसम्पादकः

प्रो॰ राधावल्लभत्रिपाठी
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

पाठलेखनम्

श्री उमाकान्त तिवारी
कनिष्ठशोध-अध्येता
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
लखनऊपरिसरः, लखनऊ (उ.प्र.)
(०९-११ पाठाः)

श्री मुकेशकुमारः
अतिथि प्राध्यापक (मु.स्वा.पी.)
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
जनकपुरी, नई दिल्ली-110058
(१२ पाठः)

सम्पादनम्

डॉ. विनोदकुमारशर्मा
उपाचार्यो ज्योतिषविभागाध्यक्षश्च
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.वि.),
जयपुरपरिसरः, राजस्थानम्

पाठ्यक्रमसंयोजनम्

डॉ. श्यामदेवमिश्रः
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनम्

डा. रमाकान्तपाण्डेयः
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१४, पुनर्मुद्रणम् : २०१५

ISBN : 978-93-82091-51-6

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसामग्र्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।

प्रयुक्तकागदम् - Agro-based environment Friendly.

पृष्ठविन्यासः

राजीवकुमारसिंहः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

संजयकुमारशर्मा
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खण्डपरिचयः

आचार्यसेतुपाठ्यक्रमस्य चतुर्थपत्रे तृतीखण्डे भवतः स्वागतम्। अस्मिन् तृतीयखण्डे विवाहविषयकाः प्रश्नाः, विविधप्रकारकाणां विवाहानां योगाः, स्त्रीमरणयोगः, द्विभार्यायोगः, दम्पत्योः परस्परं प्रीतियोगः गर्भस्य शुभाशुभविमर्शः, विविधयोगस्वरादिमाध्यमैः गर्भप्रसव-गर्भक्षयादिविचारः, विविधरोगानां ज्ञानं, रोगिणः भूतप्रेतजन्यकष्टादियोगाः, नष्टद्रव्यस्य लाभ-स्थान-दिशा-समयादीनां च चिन्तनं वर्तते। एतेषां प्रमुखविषयाणाम् अध्यनेन भवान् नूनमेव विवाह-दाम्पत्य-गर्भ-रोगादिविषयेषु प्रवीणो भविष्यति तथा च नष्टद्रव्यस्य लाभालाभज्ञाने अपि निपुणो भविष्यति। एवम् एते विषयाः तृतीयखण्डे अधिगन्तव्याः सन्ति।

९.	नवमः पाठः	–	विवाहप्रश्नाः
१०.	दशमः पाठः	–	गर्भक्षेमप्रश्नविचारः
११.	एकादशः पाठः	–	रोगिप्रश्नविचारः
१२.	द्वादशः पाठः	–	नष्टद्रव्यप्रश्नविचारः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नवमः पाठः (विवाहप्रश्नाः)

पाठसंरचना

९.१ प्रस्तावना
९.२ उद्देश्यम्
९.३ विवाहप्रश्नविचारः
९.३.१ विवाहकारकयोगः
९.३.२ शीघ्रविवाहकारकयोगः
बोधप्रश्नाः
९.४ प्रणयोद्वाहयोगः
९.५ अविवाहयोगः
बोधप्रश्नाः
९.६ स्त्रीमरणयोगः
९.६.१ प्रथमस्त्रीमरणयोगः
९.७ द्विभार्यायोगः
बोधप्रश्नाः
९.८ दम्पत्योः परस्परं प्रीतियोगः
९.८.१ दम्पत्योः पीयूषप्रीतियोगः
९.८.२ आज्ञापालकपतिपत्नियोगः
९.९ दम्पत्योः परस्परं गुणतुल्यता
बोधप्रश्नाः
९.१० सारांशः
९.११ शब्दावली
९.१२ सन्दर्भग्रन्थः
९.१३ सहायकग्रन्थाः
९.१४ बोधप्रश्नोत्तराणि
९.१५ अभ्यासप्रश्नाः

९.१ प्रस्तावना

प्रियच्छात्र! अस्मिन् विवाहप्रश्नाख्ये नवमे पाठे भवतः स्वागतम्। विवाहसम्बन्धिप्रश्नस्य प्रश्नकुण्डल्या विवेचनं कथं भवति इति विषयः एव अस्मिन् पाठे वर्णिताः सन्ति। शास्त्रेषु ''भार्या त्रिवर्गकरणं शुभशीलयुक्ता'' सूक्तिरियं प्रसिद्धा वर्तते। अतः सम्प्राप्ते युवाकाले प्रायः जनाः दैवज्ञं स्वभार्याविषये पृच्छन्ति, यत् मम विवाहः भविष्यति न वा, कीदृशी भार्या मिलिष्यति, दाम्पत्यसुखं भविष्यति न वेत्यादिकम्। एतेषां विषयानामेव प्रश्नकुण्डल्या दैवज्ञेन कथं विचार्यते इति पाठेऽस्मिन् वर्ण्यं वर्तते। तत्रापि अस्य पाठस्य तृतीये पाठ्यांशे विवाहप्रश्नविचारणे प्रष्टुः विवाहकारकयोगाः शीघ्रविवाहकारकयोगाश्च निरूप्यन्ते। चतुर्थे पाठ्यांशे प्रेमविवाहः भविष्यति न वा इत्यस्य प्रश्नस्य विचारं क्रियते। पञ्चमे पाठ्यांशे प्रष्टुः प्रश्नकुण्डल्याम् अविवाहयोगाः निरूप्यन्ते। ततः अस्य षष्ठे पाठ्यांशे स्त्रीमरणयोगाः सप्तमे पाठ्यांशे द्विभार्यायोगाः, अष्टमे पाठ्यांशे दम्पत्योः परस्परं प्रीतियोगाः तत्र च पीयूषप्रीतिः, आज्ञापालकपतिपत्नीयोगाश्च निरूप्यन्ते। ततः अन्ते नवमे पाठ्यांशे दम्पत्योः कः अधिकगुणी भविष्यति इत्यस्य प्रश्नस्य विचारः कथं भवेदिति विषयाः वर्ण्यन्ते। एवम् प्रकारेण पाठोऽयं दाम्पत्यसम्बन्धिचिंतानां प्रश्नकुण्डल्या विचारणार्थम् अति महत्त्वपूर्णं परिलक्षते-

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- प्रष्टुः विवाहो भविष्यति न वा इति प्रश्नकुण्डल्या ज्ञातुं शक्ष्यति।
- प्रष्टुः प्रेमविवाहः भविष्यति न वा इति निश्चेतुं शक्ष्यति।
- प्रष्टुः स्त्रीमरणं यदि स्यात्तर्हि पूर्वं निद्रिष्टुं शक्ष्यति।
- प्रष्टुः द्वे भार्ये भविष्यतः न वा इत्यपि वक्तुं शक्ष्यति।
- दाम्पत्ये परस्परं प्रीतिः भविष्यति न वा इति कथितुं शक्ष्यति।

९.३ विवाहप्रश्नविचारः

विवाहसम्बन्धिप्रश्नस्य विचारः विवाहप्रश्नविचारः भवति। लोके जनाः प्रायः युवावस्थायां गते सति दैवज्ञं पृच्छन्तः मिलन्ति यत् मम विवाहः भविष्यति न वा, भविष्यति चेत् कदा? पत्न्या सह सम्यक्प्रीतिः भविष्यति न वा, मम भाग्ये स्त्रीसुखं वर्तते न वा? इत्यादयो विवाहप्रश्नस्य विचारणीयाः विषयाः भवन्ति।

विवाहसम्बन्धिप्रश्ने प्रायः सप्तमभावेन विचारः क्रियते। यतो हि सप्तमभावः स्त्रीभावः भवति। एतदतिरिक्तं चतुर्थभावः घृतायाः भार्यायाः कारकः कथ्यते, अतः कदाचित् चतुर्थभावेनापि स्त्रीसुखस्य विचारः क्रियते। ग्रहेषु शुक्रः (मदनेशः) तथा चन्द्रः विवाहप्रश्ने कारणभूतः भवति। परन्तु प्रश्नकाले शुभग्रहाः तथा केन्द्र (१,४,७,१०) त्रिकोण (५,६) तथा लाभभावाः विवाहसुखे प्रमुखभूमिकां निर्वहन्ति। अतः प्रश्नशास्त्री उक्तविषयान् सम्यङ्निरीक्ष्य एव विवाहप्रश्नस्य अथवा स्त्रीसुखसम्बन्धिप्रश्नस्य उत्तरं दद्यात् इति।

९.३.१ विवाहकारकयोगाः

मम विवाहः भविष्यति न वा इति विषयकचिन्तायां प्रश्नकाले चन्द्रः यदि लग्नात् तृतीये-पञ्चमे-षष्ठे-सप्तमे वा एकादशे भावे स्थितः शुभग्रहेण दृष्टः स्यात्तदा विवाहकारकयोगः भवति, अतः विवाहः भविष्यति इति दैवज्ञः निद्रिशेत्। तथैव शुभग्रहाः केन्द्रत्रिकोणसंस्था अपि विवाहयोगकारकाः भवन्ति। उक्तञ्च प्रश्नभूषणे-

त्रिसप्तमायपञ्चमारिभावगो निशाकरो
रविज्ञजीवविक्षितो विवाहकारको भवेत्।
त्रिकोणकेन्द्रगा गुरुज्ञशुक्रशीतभानवो
यदीहलग्नतो भवन्ति वा विवाहकारकाः॥

पदविच्छेदः – त्रि, सप्तम, आय, पञ्चम, अरि, भावगः, निशाकरः, रवि, ज्ञ, जीव, वीक्षितः, विवाहकारकः, भवेत्। त्रिकोण, केन्द्रगाः, गुरु, ज्ञ, शुक्र, शीतभानवः, यदि, इह, लग्नतः, भवन्ति, वा, विवाहकारकाः॥

पदान्वयः – त्रि-सप्तम-आय-पञ्चम-अरि-भावगः निशाकरः, रवि-ज्ञ-जीव-वीक्षितः विवाहकारकः भवेत्। यदि इह लग्नतः त्रिकोण-केन्द्रगाः गुरु-ज्ञ-शुक्रशीतभानवः तदा विवाहकारकाः भवन्ति।

प्रतिपदार्थः – त्रि = तृतीयः भावः, सप्तमः = सप्तमभावः, आयः = एकादशभावः, पञ्चमः = पञ्चमभावः, अरिः = षष्ठभावः, भावगः = उक्तभावेषु-गतः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निशाकरः = चन्द्रः, रविः = सूर्यः, ज्ञः = बुधः, जीवः = गुरुः, वीक्षितः = दृष्टः, विवाहकारकः = विवाहस्य कारकः (सूचकः) भवेत्। त्रिकोणकेन्द्रगाः = त्रिकोणः पञ्चमनवमभावौ, केन्द्रः = प्रथम-चतुर्थ-सप्तम-दशमभावाः, एतेषु भावेषु गताः, गुरुः = गुरुग्रहः, ज्ञः = बुधग्रहः, शुक्रः = शुक्रग्रहः, शीतभानुः = चन्द्रः (एते ग्रहाः), तदा विवाहकारकाः = विवाहस्य कारकाः भवन्ति।

सरलार्थः- विवाहचिन्ताप्रश्नकाले यदि चन्द्रः लग्नात् तृतीय-एकादश-सप्तम-पञ्चम- षष्ठभावेषु कुत्रापि स्थितः शुभग्रहेण दृष्टः तथा विवाहयोगः सम्भवति। अथवा लग्नात् केन्द्रत्रिकोणसंस्थाः गुरु-बुध-शुक्र-चन्द्रग्रहाः (शुभग्रहाः) अपि विवाहकारकाः भवन्ति।

उक्तयोग एव षट्पञ्चाशिकायाम् आचार्येण पृथुयशसा निर्दिष्टं। तद्यथा -

गुरुरविसौम्यैर्दृष्टः त्रिसुतमदायारिगः शशिलग्नात्।
भवति च विवाहकर्त्ता त्रिकोणकेन्द्रेषु वा सौम्याः॥

पदविच्छेदः - गुरुः, रविः, सौम्यैः, दृष्टः, त्रि, सुत, मद, आय, अरिगः, शशिः, लग्नात्, भवति, च, विवाहकर्त्ता, त्रिकोण, केन्द्रेषु, वा, सौम्याः॥

पदान्वयः - लग्नात् त्रि-सुत-मद-आय-अरिगः-गुरु-रवि-सौम्यैः दृष्टश्च। राशिः विवाहकर्त्ता भवति। त्रिकोण-केन्द्रेषु (स्थिताः) सौम्याः (अपि विवाहकारकाः भवन्ति)।

प्रतिपदार्थः - लग्नात् = प्रश्नलग्नात् (प्रथमभावात्), त्रि = तृतीयभावं, सुत = पञ्चमभावं, मद = सप्तमभावं, आय = एकादशभावं, अरिगः = षष्ठभावं (वा) गतः, गुरुरविसौम्यैः = गुरुः = गुरुग्रहः, रविः = सूर्यग्रहः, सौम्यः = बुधग्रहः (एतै त्रिभिः ग्रहैः) दृष्टः = वीक्षितः च, शशिः = चन्द्रः, विवाहकर्त्ता = विवाहस्य कारकः, भवति। वा = अथवा, त्रिकोणकेन्द्रेषु = त्रिकोणः = पञ्चमनवमभावौ, केन्द्रः = प्रथम-चतुर्थ-सप्तम-दशमभावाः (उक्तभावेषु) स्थिताः = गताः, सौम्याः = शुभग्रहाः (बुध-गुरु-शुक्र-चन्द्राः) अपि विवाहस्य कारकाः भवन्ति।

सरलार्थः - प्रश्नलग्नात् तृतीयम्, पञ्चमम्, सप्तमम्, एकादशम् अथवा षष्ठभावं गतः चन्द्रः यदि गुरु-सूर्य-बुधैः दृष्टः स्यात्तदा विवाहस्य कारकः सूचको वा भवति। अथवा प्रश्नलग्नात् केन्द्रत्रिकोणसंस्थिताः शुभग्रहाः अपि विवाहस्य सूचकाः भवन्ति।

ध्यातव्यम् - उक्तयोगाः प्रश्नकाले विवाहस्य सूचकयोगाः सन्ति। विवाहचिन्तायां यदि उक्तयोगेषु कश्चिद्भवेत्तदा विवाहः भविष्यति इति दैवज्ञः पृच्छकं निर्दिशेत्। उक्ते योगे प्रायः चन्द्रस्य स्थितिः निर्दिष्टा वर्तते, चन्द्रस्य विवाहकारकत्वात्। द्वितीये योगे शुभयोगानां स्थितिवशात् विवाहयोगः निर्दिष्टः। प्रश्नवैष्णवनामकग्रन्थे दैवज्ञेन उमाकान्तमहोदयेन शुक्रस्य विवाहकारकत्वं निर्दिशन् उक्तम् यत् प्रश्नलग्नात् प्रथम-सप्तम-दशमेकादशभावगतः शुक्रः यदि शुभग्रहेण वीक्षितः तदापि विवाहस्य कारकः भवति इति। तद्यथा -

शुक्रो विलग्नास्तभवास्पदस्थः
शुभेक्षितः स्यात् सुभगाङ्गनाप्तये।
जाया त्रिलाभास्पदपञ्चमस्थ-
श्चन्द्रः शुभैर्दृष्टयुतोऽङ्गनाप्रदः॥

पदविच्छेदः- शुक्रः, विलग्न, अस्त, भव, आस्पदस्थः, शुभेक्षितः, स्यात्, सुभगाङ्गना, आप्तये, जाया, त्रि, लाभ, आस्पद, पञ्चमस्थः, चन्द्रः, शुभैः, दृष्टः, युतः, अङ्गनाप्रदः॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदान्वयः – विलग्न-अस्त-भव-आस्पदस्थः शुभेक्षितश्च शुक्रः सुभगाङ्गनाप्तये स्यात्। (पुनः) जाया-त्रि-लाभ-आस्पद-पञ्चमस्थः शुभै दृष्टः युतः (वा) चन्द्रः अङ्गनाप्रदः (भवति)।

प्रतिपदार्थः – विलग्नः = प्रथमभावः, अस्तः = सप्तमभावः, भवः = एकादशभावः, आस्पदः = दशमभावः, स्थः = उक्तभावेषु संस्थितः, शुभेक्षितः = शुभग्रहेण दृष्टः च शुक्रः, सुभगाङ्गनाप्तये = शोभनास्त्रीप्राप्त्यर्थं (विवाहे सुन्दरशोभनाभार्यायाः सूचकः) स्यात्। (पुनः) जाया = सप्तमभावः, त्रि = तृतीयभावः, लाभः = एकादशभावः, आस्पदः = दशमभावः, पञ्चमस्थः = पञ्चमभावगतश्च, शुभैः = शुभग्रहैः दृष्टः, युतः वा चन्द्रः अङ्गनाप्रदः = स्त्रीप्रदः (विवाहकारकः) भवति।

सरलार्थः – विवाहचिन्तायां प्रश्नलग्नात् प्रथम-सप्तम-एकादश-दशमभावेषु गतः शुक्रः शुभग्रहेण दृष्टः स्यात्तदा विवाहे शोभनास्त्रियः प्राप्तिः भवति। तथा च सप्तम-तृतीय-एकादश-दशम-पञ्चमभावगतः शुभग्रहेण दृष्टः युतो वा चन्द्रः विवाहकारकः भवति।

९.३.२ शीघ्रविवाहकारकयोगः

विवाहसम्बन्धिपृच्छायां प्रश्नलग्नेश-सप्तमेशौ स्व-स्वराशौ अथवा स्व-स्वोच्चराशौ स्थितौ परस्परं वीक्षितौ च स्यातां तदा शीघ्रविवाहः भवेदिति दैवज्ञः वदेत्। तथैव प्रश्नकाले लग्नेशः सप्तमे सप्तमेशश्च लग्ने स्यातां तदा शीघ्रविवाहः निर्दिशेत् इति। उक्तञ्च प्रश्नभूषणे-

प्रश्नलग्नेशजायाधिपौ स्वर्क्षगौ
उच्चभावस्थितौ चेन्मिथो वीक्षितौ।
लग्नपः सप्तमे सप्तमेशो यदा
लग्नगः सत्वरं यद्विवाहं वदेत्॥

पदविच्छेदः – प्रश्नलग्नेशः, जायाधिपौ, स्व, ऋक्षगौ, उच्चभावस्थितौ, चेत्, मिथः, वीक्षितौ, लग्नपः, सप्तमे, सप्तमेशः, यदा, लग्नगः, सत्वरं यत्, विवाहं, वदेत्॥

पदान्वयः – प्रश्नलग्नेश - जायाधिपौ स्वर्क्षगौ उच्चभावस्थितौ मिथः वीक्षितौ चेत् (अथवा) यदा लग्नपः सप्तमे सप्तमेशः लग्नगः (तदा) सत्त्वरं विवाहं वदेत्।

प्रतिपदार्थः – प्रश्नलग्नेशः = प्रश्नकुण्डल्यां प्रथमभावस्य स्वामी, जायाधिपः = सप्तमेशः, स्वर्क्षगौ = स्वस्वराशौ गतौ उच्चभावस्थितौ = उच्चराशौ स्थितौ, मिथः = परस्परं, वीक्षितौ, चेत् (अथवा) यदा लग्नपः = लग्नेशः, सप्तमे = सप्तमे भावे, सप्तमेशः = सप्तमभावस्य स्वामी, लग्नगः = प्रथमे भावे गतः तदा सत्वरं = शीघ्रं विवाहः भविष्यति इति वदेत्।

सरलार्थः – प्रश्नकाले लग्नेशः सप्तमेशश्च द्वावपि स्व-स्वराशौ, स्व-स्व-उच्चे वा स्थितौ परस्परं वीक्षितौ च स्यातां तदा, अथवा, लग्नेशः सप्तमे भावे, सप्तमेशश्च लग्ने भवेत् तदापि शीघ्रं विवाहः भविष्यति इति दैवज्ञः वदेत्।

बोधप्रश्नाः

१. कुण्डल्यां स्त्रीभावः कः भवति?

२. विवाहचिन्तायां प्रश्नकाले चन्द्रः तृतीये भावे स्यात् तदा विवाहः भविष्यति न वा?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३. विवाहसम्बन्धि-प्रश्नलग्नात् केषु भावेषु गतः शुक्रः विवाहकारकः भवति?

४. विवाहप्रश्ने लग्नेश-सप्तमेशौ स्वराशौ स्वोच्चराशौ वां स्यातां तदा किं फलं भवति?

९.४ प्रणयोद्वाहयोगः

प्रणयोद्वाहशब्दस्य अर्थः भवति ''प्रेमविवाहः'' इति। यदि कश्चित्पृच्छकः दैवज्ञं पृच्छति यत् मम प्रेमविवाहः भविष्यति न वा, तदा उपरोक्तेषु विवाहकारकयोगेषु सत्स्वपि पुनः यदि–

१. चन्द्रः लग्नात् त्रि-षट्-सप्तम-दशम-एकादशभावेषु कुत्रचित् शुभग्रहस्य राशौ (वृष-मिथुन-कर्क-कन्या-तुला-धनु-मीनराशिष्वन्यतमे) गतः बुधगुरुसूर्यैः वीक्षितः स्यात्तदा प्रणयोद्वाहः भवति।

२. लग्नेशः द्वादशभावे, द्वादशेशश्च लग्ने अथवा लग्नेश-व्ययेशौ अन्योन्यस्य राश्यां स्थितौ स्यातां तदा प्रणयोद्वाहः भवति।

३. लग्नेशसप्तमेशौ अन्योऽन्यस्थानगतौ स्यातां तदा प्रणयोद्वाहः भवति।

४. चन्द्रः शुक्रश्च स्व-स्वराशौ अथवा स्व-स्वोच्चे स्थितौ स्यातां तदापि प्रणयोद्वाहः भवति।

विशेषः – अयं विषयः भुवनदीपकग्रन्थे विज्ञानभाष्ये, आचार्यस्य रामदयालु शर्मणः ''संकेतनिधिः'' इत्याख्यस्य ग्रन्थस्य मतं नीत्वा उद्धृतः वर्तते।

९.५ अविवाहयोगः

विवाहः भविष्यति न वा इत्याशङ्कायां प्रश्नकाले यदि चन्द्रः केन्द्र - (१,४,७,१०) अष्टम-एकादश-पञ्चमभावेषु स्थितः स्यात् पुनः, पापग्रहैः युतोऽपि अंशैः तदपेक्षया अल्पः भवेत् तदा विवाहः न भविष्यति इति ज्ञातव्यम्। उक्तञ्च प्रश्नवैष्णवाभिधे ग्रन्थे-

केन्द्रलाभाष्टपुत्रस्थे चन्द्रे पापेत्थशालगे।
न भवेत् कन्यकालाभः पापैर्वा केन्द्ररन्ध्रगैः॥

पदविच्छेदः – केन्द्रः, लाभः, अष्ट, पुत्रस्थे, चन्द्रे, पापे, इत्थशालगे, न, भवेत्, कन्यकालाभः, पापैः, वा, केन्द्र, रन्ध्रगैः॥

पदान्वयः – केन्द्र-लाभ-अष्ट-पुत्रस्थे चन्द्रे, पापे इत्थशालगे च वा केन्द्र-रन्ध्रगैः पापैः कन्यकालाभः न भवेत्।

प्रतिपदार्थः – केन्द्रे = प्रथम-चतुर्थ-सप्तम-दशमभावे, लाभे = एकादशभावे, अष्टे = अष्टमभावे, पुत्रस्थे = पञ्चमभावे गते, चन्द्रे, पापे = पापग्रहे, इत्थशालगे = चन्द्रेण इत्थशालयोगे निर्मिते सति, च, वा = अथवा, केन्द्रे = प्रथम-चतुर्थ-सप्तम-दशमभावे, रन्ध्रगैः = अष्टमभावे स्थितैः, पापैः = पापग्रहैः, कन्यकालाभः = विवाहाय पत्नीलाभः न भवेत्।

सरलार्थः – विवाहसम्बन्धिप्रश्नकाले चन्द्रः यदि प्रथम-चतुर्थ-सप्तम-दशम-एकादश-अष्टम-पञ्चमभावेषु कुत्रचित् स्यात् तथा च पापग्रहः कश्चित् चन्द्रेण सह इत्थशालयोगं निर्मियेत् तदा अथवाऽपि पापग्रहाः प्रथम-चतुर्थ-सप्तम-दशम-अष्टमभावेषु स्युः तदा प्रष्टुं विवाहः स्त्रीलाभः वा न भवति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ध्यातव्यम् – पूर्वोक्ते योगे इत्थशालनामकस्य योगविशेषस्य वर्णनमासीत्।

यदि कस्मिंश्चित् राशौ द्वौ ग्रहौ स्यातां तेषां मध्ये अल्पांशान्तरेऽपि तीव्रगतिकस्य ग्रहस्यापेक्षया मन्दगतिकः ग्रहः अधिकांशगः स्यात्तदा इत्थशालयोगः भवति। यथोक्तं नीलकण्ठ्यां-

शीघ्रोऽल्पभागैर्धनभागमन्दे-
ऽग्रस्थे निजं तेज उपाददीत।
स्यादित्थशालोऽयमथो विलिप्ता
लिप्तार्धहीनो यदि पूर्णमेतत्॥

पदविच्छेदः – शीघ्रः, अल्पभागैः, घनभागे, मन्दे, अग्रस्थे, निजं, तेज, उपाददीत, स्यात्, इत्थशालः, अयम्, अथ, विलिप्ता, लिप्तार्धहीनः, यदि, पूर्णम्, एतत्॥

बोधप्रश्नाः

५. प्रेमविवाहसम्बन्धिप्रश्ने लग्नेश-व्ययेशौ अन्योन्यभावगतौ स्यातां तदा प्रेमविवाहः भवति। सत्यम् असत्यं वा ?

६. विवाहः भविष्यति न वेति प्रश्नकाले केन्द्रस्थेन चन्द्रेण पापग्रहाः इत्थशालं निर्मान्ति तदा किं वक्तव्यम्?

९.६ स्त्रीमरणयोगः

प्रश्नकाले चतुर्थे भावे अथवा सप्तमे भावे पापग्रहाः स्युः तथा शुक्रः निर्बलः भवेत्तदा स्त्रीसुखं न भवति। तस्या स्त्री म्रियते इति प्रश्नभूषणे उक्तं दैवज्ञेन जीवनाथझामहोदयेन–

सप्तमे सुखभे क्रूरो भार्गवो यदि दुर्बलः।
न जीवति तदा नारी राहुर्वा कामिनीगृहे॥

पदविच्छेदः – सप्तमे, सुखभे, क्रूरः, भार्गवः, यदि, दुर्बलः, न, जीवति, तदा नारी, राहुः वा, कामिनी, गृहे॥

पदान्वयः – यदि सप्तमे (अथवा) सुखभे क्रूरः (स्यात्) भार्गवः च दुर्बलः (भवेत्) वा कामिनीगृहे राहुः (भवेत्) तदा नारी न जीवति।

प्रतिपदार्थः – यदि सप्तमे = सप्तमे भावे, (अथवा) सुखभे = चतुर्थे भावे, क्रूरः = क्रूरग्रहः (स्यात्), भार्गवः = शुक्रः, च दुर्बलः = बलहीनः भवेत्, वा = अथवा, कामिनीगृहे = सप्तमभावे, राहुः भवेत् तदा, नारी = पत्नी न जीवति।

सरलार्थः – प्रश्नकाले सप्तमे अथवा चतुर्थे भावे क्रूरग्रहः स्यात् शुक्रश्च दुर्बलः स्यात्तदा प्रष्टुः विवाहिता स्त्री न जीवति, अथवा तस्या स्त्रियः मरणं भवति इति ज्ञेयम्। अथवा पुनः प्रश्नकाले यदि राहुः सप्तमे भावे स्यात्तदा प्रष्टुः स्त्रियः मरणं भवति।

९.६.१ प्रथमस्त्रीमरणयोगः

प्रश्नकाले सप्तमभावे पापग्रहः स्यात् तथा चतुर्थे भावे शुभग्रहः स्यात्तदा प्रथमा विवाहिता स्त्री म्रियते तथा धृता भार्या गृहे निवसति इति। उक्तं हि –

सप्तमे खलसंयुक्ते चतुर्थे शुभसंयुते।
म्रियते प्रथमा नारी धृता च परितिष्ठति॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदच्छेदः – सप्तमे, खलसंयुक्ते, चतुर्थे, शुभसंयुते, म्रियते, प्रथमा, नारी, धृता, च परितिष्ठति।

पदान्वयः – सप्तमे खलसंयुक्ते चतुर्थे शुभसंयुते (तदा) प्रथमा नारी म्रियते, धृता च परितिष्ठति।

प्रतिपदार्थः – सप्तमे = सप्तमे भावे, खलसंयुक्ते = क्रूरग्रहयुक्ते, चतुर्थे = चतुर्थभावे, शुभसंयुते = शुभग्रहेण युक्ते (तदा) प्रथमा नारी = प्रथमा विवाहिता स्त्री, म्रियते = मरणं प्राप्नोति, धृता च परितिष्ठति = जीवति।

सरलार्थः – प्रश्नकाले सप्तमभावे क्रूरग्रहयुक्ते, चतुर्थे भावे च शुभग्रहेण युक्ते सति प्रथमा विवाहिता स्त्री म्रियते तथा अपरा धृता स्त्री जीवति, (गृहे निवसति)।

९.७ द्विभार्यायोगः

भार्यासुखसम्बन्धिप्रश्नकाले यदि चतुर्थः सप्तमः पञ्चमश्च भावः शुभग्रहैः वीक्षितः भवेत् तदा प्रष्टुः द्वे भार्ये भवतः। एका परिणीता अन्या धृता चेति। प्रश्नभूषणे उक्तं वर्तते–

चतुर्थं सप्तमञ्चैव पञ्चमं सौम्यवीक्षितम्।
विवाहिता धृता चापि द्वे भार्ये भवतस्तदा॥

पदविच्छेदः – चतुर्थं, सप्तमं, च, एव, पञ्चमं, सौम्यवीक्षितम्, विवाहिता, धृता, च, अपि, द्वे, भार्ये, भवतः, तदा॥

पदान्वयः – चतुर्थं सप्तमं पञ्चमं चैव सौम्यवीक्षितं तदा विवाहिता धृता चापि द्वे भार्ये भवतः।

प्रतिपदार्थः – चतुर्थं = चतुर्थभावं, सप्तमं = सप्तमभावं, पञ्चमं = पञ्चमभावं चैव, सौम्यवीक्षितं = शुभग्रहेण दृष्टं तदा विवाहिता = विवाहसंस्कारेण आगता, धृता = धनेन, प्रेम्णा अपहरणेन वा गृहीता, चापि, द्वे = उक्ते द्वे, भार्ये भवतः।

सरलार्थः – प्रश्नकाले चतुर्थ-सप्तम-पञ्चमभावाः शुभग्रहेण दृष्टाः स्युः तदा प्रष्टुः एका विवाहसंस्कारादागता, अपरा च धृता, एवं द्वे भार्ये भवतः इति।

अस्मिन्नेव प्रकरणे भुवनदीपके एवम्प्रकारेण वर्णितं वर्तते –

स्थाने चतुर्थे सौम्यत्वमापन्ने ललना धृता।
सप्तमे सौम्यतां प्राप्ते प्रष्टुः कान्ता विवाहिता॥

पदविच्छेदः – स्थाने, चतुर्थे, सौम्यत्वमापन्ने, ललना, धृता, सप्तमे, सौम्यतां, प्राप्ते, प्रष्टुः, कान्ता, विवाहिता॥

पदान्वयः – चतुर्थे स्थाने सौम्यत्वमापन्ने धृता ललना (भवति) तथा सप्तमे सौम्यतां प्राप्ते प्रष्टुः विवाहिता कान्ता भवति।

प्रतिपदार्थः – चतुर्थे स्थाने = चतुर्थभावे, सौम्यत्वमापन्ने = शुभग्रहेण युक्ते, धृता = धनेन, प्रेम्णा, अपहरणेन वा गृहीता, ललना = पत्नी भवति, तथा सप्तमे = सप्तमभावे, सौम्यतां प्राप्ते = शुभग्रहेण युक्ते, प्रष्टुः = प्रश्नकर्तुः, विवाहिता = विवाहसंस्कारेण प्राप्ता, कान्ता = पत्नी, भवति।

सरलार्थः – विवाहप्रश्नकाले यदि चतुर्थभावः शुभग्रहेण युक्तः स्यात्तदा प्रष्टुः धृता

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भार्या भवति, तथैव सप्तमभावः यदि शुभग्रहेण युक्तः स्यात्तदा प्रष्टुः विवाहसंस्कारात् प्राप्ता भार्या भवति।

उभयोः सौम्यतां प्राप्ते द्वे स्तो धृतविवाहिते।
उभयोः क्रूरतां प्राप्ते न धृता न विवाहिता॥

पदविच्छेदः – उभयोः, सौम्यतां, प्राप्ते, द्वे, स्तः, धृतविवाहिते, उभयोः, क्रूरतां, प्राप्ते, न, धृता, न, विवाहिता॥

पदान्वयः – उभयोः सौम्यतां प्राप्ते धृत-विवाहिते द्वे (भार्ये) स्तः। (तथा) उभयोः क्रूरतां प्राप्ते न धृता न विवाहिता भार्या भवति।

प्रतिपदार्थः – उभयोः = चतुर्थसप्तमभावयोः सौम्यतां प्राप्ते = शुभग्रहाणां प्रभावयुक्ते, धृतविवाहिते = धृता च विवाहिता च एते, द्वे भार्ये स्तः, तथा, उभयोः = चतुर्थसप्तमभावयोः, क्रूरतां प्राप्ते = क्रूरग्रहाणां प्रभावयुक्ते, न, धृता = गृहीता, न विवाहिता = विवाहसंस्कारात् प्राप्ता, भार्या = पत्नी भवति।

सरलार्थः – स्त्रीसम्बन्धिप्रश्नकाले चतुर्थ-सप्तमभावौ द्वावपि शुभग्रहाणां प्रभावयुक्तौ भवेतां तदा प्रष्टुः धृता-विवाहिता च द्वे भार्ये भवतः। परन्तु उक्तौ द्वावपि भावौ (चतुर्थसप्तमभावौ) क्रूरग्रहाणां प्रभावयुक्तौ भवेतां तदा प्रष्टुः न धृता भार्या भवति नैव विवाहिता भार्या भवति। अर्थात् स्त्रीसुखं न भवति।

बोधप्रश्नाः

7. स्त्रीप्रश्ने सप्तमचतुर्थभावयो क्रूरग्रहयोः किं फलं भवति?
8. प्रश्नकाले केन योगेन प्रष्टुः द्वे भार्ये भवतः इति ज्ञातव्यं भवति?
9. चतुर्थसप्तमभावयोः कुत्रस्थेन शुभग्रहेण विवाहिता भार्या भवति?

९.८ दम्पत्योः परस्परं प्रीतियोगः

दम्पत्योः परस्परं प्रीतिवशादेव गृहस्थजीवनं साफल्यं याति। अतः प्रत्येकं दम्पतिः परस्परम् अनुरागस्य कामनां करोति। अविवाहितश्च विवाहात्परं स्वसङ्गिना सह परस्परं प्रीतिः भविष्यति न वा इति विषये सशङ्कितः भवति। कदाचित् बहवः जनाः एतद्विषये दैवज्ञमपि पृच्छन्ति। तदा दैवज्ञेन प्रश्नकुण्डलीं सम्यङ्निरीक्ष्य उत्तरं देयं भवति।

प्रश्नभूषणाभिधे ग्रन्थे उक्तं वर्तते यत् प्रश्नकाले यदि लग्नेशः लग्ने सप्तमेशश्च सप्तमे भावे स्यात् अथवा लग्नेशः सप्तमे, सप्तमेशश्च लग्ने स्यात्तदा प्रष्टुः दाम्पत्यसुखं वृद्धतां याति। अर्थात् दाम्पत्यसुखम् अधिकं भवति। तद्यथा–

लग्नजायाधिपौ स्वस्थौ यदि वा व्यत्ययेन तौ।
दिने-दिनेऽधिका प्रीतिर्द्रम्पत्योर्जायते मिथः॥

पदविच्छेदः – लग्नजायाधिपौ, स्वस्थौ, यदि, वा, व्यत्ययेन, तौ, दिने, दिने, अधिका, प्रीतिः, दम्पत्योः, जायते, मिथः॥

पदान्वयः – लग्नजायाधिपौ यदि स्वस्थौ (स्याताम्) वा तौ व्यत्ययेन (स्थितौ) तदा दम्पत्योः मिथः प्रीतिः दिने-दिन अधिका जायते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपदार्थः – लग्न-जायाधिपौ = प्रथमभावस्य सप्तमभावस्य च स्वामिनौ, स्वस्थौ = स्व-स्वराशिगतौ स्याताम्, वा = अथवा, तौ = प्रथम-सप्तमभावयो अधिपतौ, व्यत्ययेन = विपरीतरूपेण अर्थात् प्रथमभावस्याधिपतिः सप्तमभावे तथा सप्तमभावस्याधिपतिः प्रथमभावे, स्थितौ, तदा, दम्पत्योः = पति-पत्न्यां, मिथः = परस्परं, प्रीतिः = अनुरागः (प्रेमव्यवहारः) दिने-दिने = प्रतिदिनं अधिका जायते = वृद्धिं प्राप्नोति।

सरलार्थः – दम्पत्तिप्रीतिचिन्ताप्रश्ने यदि लग्नेशः सप्तमेशश्च स्व-स्वराशौ स्याताम् अर्थात् लग्नेशः लग्ने सप्तमेशश्च सप्तमे भावे स्याताम्, तदा दम्पत्योः परस्परं प्रीतिः प्रतिदिनं वृद्धिं प्राप्नोति। अथवा पुनः लग्नेशः सप्तमे सप्तमेशश्च लग्ने स्यातां तदापि प्रष्टुः दाम्पत्यसुखं प्रीतिः वा प्रतिदिनं वृद्धिं प्राप्नोति।

९.८.१ दम्पत्योः पीयूषप्रीतियोगः

प्रश्नकाले यदि लग्नेश-सप्तमेशयोः द्वयोरपि दृष्टिः लग्ने अथवा सप्तमे भावे भवेत्तदा प्रष्टुः दाम्पत्यं पीयूषसदृशं भवति। यथोक्तं –

लग्नजायेशयोर्दृष्टिर्लग्ने वा सप्तमे तयोः।
परस्परं तदा प्रीतिः पीयूषसदृशी भवेत्॥

पदविच्छेदः – लग्न, जायेशयोः, दृष्टिः, लग्ने, वा, सप्तमे, तयोः, परस्परं, तदा, प्रीतिः, पीयूषसदृशी, भवेत्।

पदान्वयः – लग्न-जायेशयोः लग्ने वा सप्तमे दृष्टिः भवेत् तदा परस्परं पीयूषसदृशी प्रीतिः भवेत्।

प्रतिपदार्थः – लग्न-जायेशयोः = लग्नेश-सप्तमेशयोः, लग्ने = प्रथमभावे, वा = अथवा, सप्तमे = सप्तमभावे, दृष्टिः भवेत्, तदा परस्परं = पति-पत्न्योः परस्परं, पीयूषसदृशी = अमृततुल्यं, प्रीतिः = प्रेम भवेत्।

सरलार्थः – प्रश्नकाले यदि लग्नेश-सप्तमेशयोः द्वयोः लग्ने अथवा सप्तमे भावे दृष्टिः भवेत्तदा दम्पत्योः परस्परम् अमृततुल्यं (पीयूषप्रीतिः) भवति।

९.८.२ आज्ञापालकपति-पत्नियोगः

प्रश्नकाले लग्नेशः सप्तमे भावे स्यात्तदा दम्पत्योः पतिः स्वभार्यायाः आज्ञापालकः भवति। तथैव सप्तमेशः यदि लग्ने स्यात्तदा पत्नी स्वभर्तुः आज्ञाकारिणी भवति। यथा हि–

नरो लग्नपतिः कामे जायाऽऽज्ञाप्रतिपालकः।
नारी जायाऽधिपे लग्ने पत्याज्ञाकारिणी भवेत्॥

पदविच्छेदः – नरः, लग्नपतिः, कामे, जाया, आज्ञा, प्रतिपालकः, नारी, जायाधिपे, लग्ने, पति, आज्ञाकारिणी भवेत्।

पदान्वयः – लग्नपतिः कामे (सति) नरः जायाज्ञाप्रतिपालकः तथा जायाधिपे लग्ने (सति) नारी पत्याज्ञाकारिणी भवेत्।

प्रतिपदार्थः – लग्नपतिः = प्रथमभावस्य स्वामी, कामे = सप्तमभावे सति, नरः = पुरुषः, जायाज्ञाप्रतिपालकः = स्वपत्नेः आज्ञापालकः तथा, जायाधिपे = सप्तमभावस्य स्वामिनौ, लग्ने = प्रथमभावे सति, नारी = स्त्री, पत्याज्ञाकारिणी = स्व पतेः आज्ञाकारिणी भवेत्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सरलार्थः – प्रश्नकाले लग्नेशः सप्तमभावे भवेत्तदा दम्पत्योः पुरुषः स्वपत्नेः आज्ञापालकः भवति। सप्तमेशः यदि लग्ने भवेत्तदा पत्नी स्वपतेः आज्ञाकारिणी भवति।

९.९ दम्पत्योः परस्परं गुणतुल्यता

दम्पत्योः कः अधिकगुणी भविष्यति? इत्यस्मिन् प्रश्ने यदि लग्नेशः स्वोच्चे भवेत्तदा पतिः अधिकगुणयुक्तः भवति। तथा च सप्तमेशः स्वोच्चे भवेत् तदा पत्यापेक्षया पत्नी अधिकगुणयुक्ता भवति। उक्तञ्च प्रश्नभूषणे–

प्रश्नलग्नपतिः स्वोच्चे गुणैरुच्चो भवेत्पतिः।
जायास्वामी यदोच्चस्थो नारी स्वामिगुणाधिका॥

पदविच्छेदः – प्रश्नलग्नपतिः, स्वोच्चे, गुणैः, उच्चो, भवेत्, पतिः, जायास्वामी, यदा, उच्चस्थः, नारी, स्वामिगुणाधिका।

पदान्वयः – प्रश्नलग्नपतिः स्वोच्चे (तदा) पतिः गुणैः उच्चः, जायास्वामी उच्चस्थः तदा नारी स्वामिगुणाधिका भवेत्।

प्रतिपदार्थः – प्रश्नलग्नपतिः = प्रश्नलग्नस्य स्वामी, स्वोच्चे = स्व-उच्चराशौ, तदा पतिः गुणैः उच्चः = अधिकगुणयुक्तः जायास्वामी = सप्तमेशः, उच्चस्थः = स्वोच्चराशौ स्थितः तदा, नारी = स्त्री, स्वामिगुणाधिका = पत्यपेक्षया अधिकगुणयुक्ता भवेत्।

सरलार्थः – प्रश्नलग्नेशः यदि स्वोच्चराशौ भवेत्तदा पतिः पत्न्यपेक्षया अधिकगुणयुक्तः भवेत्। पुनः यदि सप्तमेशः स्वोच्चराशौ भवेत् तदा पत्नी स्वपत्यपेक्षया अधिकगुणयुक्ता भवेदिति दैवज्ञः वदेत्।

बोधप्रश्नाः

१०. दम्पत्तिप्रीतिज्ञाने कौ भावौ द्रष्टव्यौ भवतः ?

११. दम्पत्योः पीयूषप्रीतिः कदा ज्ञातव्या ?

१२. केन योगेन पतिः पत्न्याज्ञापालकः भवेत् ?

१३. दम्पत्योः कः अधिकगुणी भविष्यति, इत्यस्मिन् प्रश्ने कथं विचार्यते ?

मूलपाठः

त्रिसप्तमायपञ्चमारिभावगो निशाकरो
रविज्ञजीववीक्षितो विवाहकारको भवेत्।
त्रिकोणकेन्द्रगा गुरुज्ञशुक्रशीतभानवो
यदीहलग्नतो भवन्ति वा विवाहकारकाः॥

गुरुरविसौम्यैर्दृष्टः त्रिसुतमदायारिगः शशिलग्नात्।
भवति च विवाहकर्त्ता त्रिकोणकेन्द्रेषु वा सौम्याः॥

शुक्रो विलग्नास्तभवास्पदस्थः
शुभेक्षितः स्यात् सुभगाङ्गनाप्तये।
जाया त्रिलाभास्पद पञ्चमस्थ-
श्चन्द्रः शुभैर्दृष्टयुतोऽङ्गनाप्रदः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नलग्नेशजायाधिपौ स्वर्क्षगौ
उच्चभावस्थितौ चेन्मिथो वीक्षितौ।
लग्नपः सप्तमे सप्तमेशो यदा
लग्नगः सत्वरं यद्विवाहं वदेत्॥

केन्द्रलाभाष्टपुत्रस्थे चन्द्रे पापेत्थशालगे।
न भवेत् कन्यकालाभः पापैर्वा केन्द्ररन्ध्रगैः॥

शीघ्रोऽल्पभागैर्घनभागमन्दे-
ऽग्रस्थे निजं तेज उपाददीत।
स्यादित्थशालोऽयमथो विलिप्ता
लिप्तार्धहीनो यदि पूर्णमेतत्॥

सप्तमे सुखभे क्रूरो भार्गवो यदि दुर्बलः।
न जीवति तदा नारी राहुर्वा कामिनीगृहे॥

सप्तमे खलसंयुक्ते चतुर्थे शुभसंयुते।
म्रियते प्रथमा नारी धृता च परितिष्ठति॥

चतुर्थ सप्तमञ्चैव पञ्चमं सौम्यवीक्षितम्।
विवाहिता धृता चापि द्वे भार्ये भवतस्तदा॥

स्थाने चतुर्थे सौम्यत्वमापन्ने ललना धृता।
सप्तमे सौम्यतां प्राप्ते प्रष्टुः कान्ता विवाहिता॥

उभयोः सौम्यतां प्राप्ते द्वे स्तो धृतविवाहिते।
उभयोः क्रूरतां प्राप्ते न धृता न विवाहिता॥

लग्नजायाधिपौ स्वस्थौ यदि वा व्यत्ययेन तौ।
दिने-दिनेऽधिका प्रीतिद्रम्पत्योर्जायते मिथः॥

लग्नजायेशयोर्दृष्टिर्लग्ने वा सप्तमे तयोः।
परस्परं तदा प्रीतिः पीयूषसदृशी भवेत्॥

नरो लग्नपतिः कामे जायाऽऽज्ञाप्रतिपालकः।
नारी जायाऽधिपे लग्ने पत्याज्ञाकारिणी भवेत्॥

प्रश्नलग्नपतिः स्वोच्चे गुणैरुच्चो भवेत्पतिः।
जायास्वामी यदोच्चस्थो नारी स्वामिगुणाधिका॥

९.१० सारांशः

प्रिय अध्येता! भवता अस्य विवाहप्रश्नाभिधस्य पाठस्य सम्यगध्ययनं कृतम्। पाठेऽस्मिन् विवाहसम्बन्धिचिन्तायां प्रश्नकुण्डल्या केन प्रकारेण विचारं कर्त्तव्यमिति विषयाः पठिताः। यथा - विवाहः भविष्यति न वेति प्रश्ने प्रश्नलग्नात् तृतीये पञ्चमे षष्ठे सप्तमे वा एकादशे भावे स्थितः चन्द्रः शुभग्रहेण दृष्टः भवेत्तदा अथवा शुभग्रहाः केन्द्रत्रिकोणगताः स्युः तदा प्रष्टुः शीघ्रं विवाहः भविष्यति। तथैव प्रश्नलग्नात् प्रथम-सप्तम-एकादश-दशमभावेषु कुत्रचित् गतः शुक्रः शुभग्रहेण दृष्टः स्यात्तदा विवाहात् शोभनास्त्रियः प्राप्तिर्भवति। प्रश्नकाले लग्नेशः सप्तमेशश्च स्व-स्वराशौ स्वोच्चे वा स्थितौ परस्परं वीक्षितौ स्याताम् अथवा लग्नेशः सप्तमे,

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्तमेशः च लग्ने स्यात्तदा शीघ्रं विवाहः भविष्यति इति दैवज्ञः प्रष्टुं निद्रिशेत्। प्रेमविवाहः भविष्यति वा इति जिज्ञासायां प्रश्नकाले चन्द्रः लग्नात् त्रि-षट्-सप्तम-दशम- एकादशभावेषु कुत्रचित् शुभग्रहस्य राशौ गतः बुध-गुरु-शुक्रैः वीक्षितः स्यात्तदा प्रणयोद्वाहः भवति। तथैव प्रश्नकाले लग्नेशः द्वादशे भावे द्वादशेशश्च लग्ने भवेत्तदा प्रणयोद्वाहः भवति। प्रणयोद्वाहचिन्तायां लग्नेश-सप्तमेशौ अन्योन्यं स्थानगतौ स्यातां तदा प्रणयोद्वाहः भवति। चन्द्रः शुक्रश्च स्व-स्वराशौ स्व-स्वोच्चे वा स्थितौ स्यातां तदा अपि प्रणयोद्वाहः भवति। परन्तु विवाहप्रश्नकाले चन्द्रः केन्द्र-अष्टम-एकादश-पञ्चमभावेषु स्थितः स्यात्तदा विवाहो न भविष्यति इति दैवज्ञेन ज्ञातव्यम्।

प्रश्नकाले चतुर्थे अथवा सप्तमे भावे पापग्रहाः स्युः शुक्रश्च निर्बलः स्यात्तदा प्रष्टुः स्त्रियः मरणं भवति। परन्तु सप्तमे पापयुक्ते चतुर्थे च शुभग्रहयुक्ते प्रष्टुः विवाहिता पत्नी म्रियते अन्या धृता जीवति। प्रश्नकाले चतुर्थ-सप्तम-पञ्चमभावाः शुभग्रहेण युक्ताः स्युस्तदा प्रष्टुः विवाहिता धृता च द्वे भार्ये भवतः। दाम्पत्यसुखविषयके परस्परं प्रीतिप्रश्ने यदि लग्नेशः लग्ने सप्तमेशश्च सप्तमे स्यात् अथवा लग्नेशः सप्तमे सप्तमेशः लग्ने स्यात्तदा प्रष्टुः दाम्पत्यप्रीतिः अनुदिनं वृद्धिं प्राप्नोति। पुनः प्रश्नकाले यदि लग्नेश-सप्तमेशयोः दृष्टिः लग्ने अथवा सप्तमे भावे स्यात् तदा दम्पत्योः पीयूषप्रीतिः भवति। तस्मिन्नपि लग्नेशः सप्तमे भावे स्यात्तदा पतिः पत्ने आज्ञापालको भवति तथा सप्तमेशः लग्ने भवेत्तदा पत्नी पत्याज्ञाकारिणी भवति। दम्पत्योः कः अधिकगुणी इति जिज्ञासायां लग्नेशे स्वोच्चे सति पतिः गुणी भवति तथा सप्तमेशे स्वोच्चे सति पत्यपेक्षया पत्नी अधिकगुणी भवति। एते विषयाः पाठेऽस्मिन्नधीताः। पाठोऽयं स्वदाम्पत्यसुखं प्रष्टुः समाधानार्थं बहूपयोगि अस्ति।

९.११ शब्दावली

१.	दम्पति	=	पति-पत्नी।
२.	प्रीतिः	=	प्रेम, अनुरागः।
३.	अङ्गना	=	युवती स्त्री।
४.	प्रणयोद्वाहः	=	प्रेमविवाहः।
५.	इत्थशालयोगः	=	योगविशेषः (एकस्मिन् राशौ स्थितयोः द्वयोः ग्रहयो अपि। तीव्रगतिकग्रहापेक्षया मन्दगतिकः ग्रहः अधिकांशगः स्यात्तदा योगोऽयं निर्मितः भवति।)।
५.	कामिनी	=	स्त्री।
६.	मिथः	=	परस्परम्।
७.	पीयूषः	=	अमृतम्।

९.१२ सन्दर्भग्रन्थः

१. **प्रश्नभूषणम् (दैवज्ञजीवनाथझा)**, आचार्यः गुरुप्रसादगौड़ः, चौखम्भा-सुरभारतीप्रकाशनम्, वाराणसी।

९.१३ सहायकग्रन्थाः

१. **प्रश्नवैष्णवः**, पं. श्रीउमाकान्त झाः, नागप्रकाशकः, यू.ए. जवाहरनगरम्, दिल्ली।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२. **भुवनदीपकम् (विज्ञानभाष्यः)**, शुकदेवचतुर्वेदी, रंजनपब्लिकेशन अंसारीरोड-दरियागंजः, नई दिल्ली।

३. **षट्पञ्चाशिका**, डॉ. सत्येन्द्रमिश्रः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी।

४. **ताजिकनीलकण्ठी**, डॉ. शिवप्रसादशर्मा, आचार्यः श्रीनिवासशर्मा, भारतीयविद्याप्रकाशनम्, दिल्ली।

५. **भुवनदीपकम्**, संस्कृतभाष्यम्, ले.-प्रो. वासुदेवशर्मा, राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः, जयपुरम्।

९.१२ बोधप्रश्नोत्तराणि

१. सप्तमः।

२. भविष्यति।

३. प्रथम-सप्तम-दशम-एकादशभावेषु।

४. शीघ्रं विवाहः भवति।

५. सत्यम्।

६. विवाहो न भविष्यति।

७. स्त्रियः सुखं न भवति।

८. प्रश्नकाले चतुर्थ-सप्तम-पञ्चमभावाः शुभग्रहेण वीक्षिताः स्युः तदा द्वे भार्ये भवतः।

९. सप्तमभावस्थेन।

१०. लग्न-सप्तमभावौ, लग्नेशः सप्तमेशश्च।

११. प्रश्नकाले लग्नेश-सप्तमेशयोः दृष्टिः लग्ने अथवा सप्तमे भावे स्यात् तदा दम्पत्यो पीयूषप्रीतिः ज्ञातव्या।

१२. लग्नेशः यदि सप्तमे भावे स्यात्।

१३. प्रश्नकाले लग्नेशः स्वोच्चराशौ भवेत्तदा पत्न्यपेक्षया पतिः अधिकगुणी भवति। तथा च सप्तमेशः स्वोच्चराशौ भवेत्तदा पत्नी पत्यपेक्षया अधिकगुणी भवति।

९.१४ अभ्यासप्रश्नाः

१. विवाहप्रश्ने शीघ्रविवाहकारकयोगान् लिखत।

२. दम्पत्योः परस्परं प्रीतियोगः लेख्यः।

३. दम्पत्योः कः कस्याज्ञापालकः भवेत् इति सप्रमाणं निद्रिशत।

—•—

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दशमः पाठः – गर्भक्षेमप्रश्नविचारः

पाठसंरचना

१०.१ प्रस्तावना
१०.२ उद्देश्यम्
१०.३ गर्भप्रश्नविचारः
१०.३.१ गर्भस्वरूपम्
१०.३.२ गर्भमासाधिपतयः
बोधप्रश्नाः
१०.४ गर्भक्षेमयोगः
१०.५ गर्भस्त्रवयोगः
१०.५.१ गर्भस्यानिष्टयोगः
१०.६ गर्भप्रसवकालज्ञानम्
१०.६.१ प्रसवकालज्ञाने मतान्तरम्
बोधप्रश्नाः
१०.७ गर्भे पुत्र-कन्यानिर्णयः
१०.७.१ ग्रहाणां स्थितिवशात् पुत्र-कन्याजन्मज्ञानम्
१०.८ प्रश्नकाले स्वरविधिना पुत्र-पुत्रीज्ञानम्
१०.९ सन्ततिहानिकरयोगः
बोधप्रश्नाः
१०.१० द्रेष्काणेन पुत्रलाभयोगज्ञानम्
१०.११ औरसादि-पुत्रयोगः
बोधप्रश्नाः
मूलपाठः
१०.१२ सारांशः
१०.१३ शब्दावली
१०.१४ सन्दर्भग्रन्थाः
१०.१५ सहायकग्रन्थाः
१०.१६ बोधप्रश्नोत्तराणि
१०.१७ अभ्यासप्रश्नाः

१०.१ प्रस्तावना

प्रियच्छात्रः! प्रश्नभूषणाभिधस्य पाठ्यपुस्तकस्य दशमे पाठे भवतः स्वागतम्। अयं पाठः "गर्भक्षेपप्रश्नविचारः" इत्याख्यः अस्ति। पाठेऽस्मिन् गर्भसम्बन्धितानां सन्ततिसम्बन्धितानां च विषयानां प्रश्नकुण्डल्यां ज्ञानार्थं विषयाः निरूप्यन्ते। तत्र च पाठस्य तृतीये पाठ्यांशे गर्भसम्बन्धितानां प्रमुखप्रश्नानां निरूपणं क्रियते। पुनः गर्भस्य दशमासेषु स्वरूपं, दशमासानामधिपतियश्च निरूप्यन्ते। चतुर्थे पाठ्यांशे प्रश्नकुण्डल्यां गर्भक्षेपयोगः, पञ्चमे पाठ्यांशे च गर्भस्रावयोगः दीयते। ततः षष्ठे पाठ्यांशे गर्भाभीष्टस्य प्रसवकालज्ञानार्थं सूत्रं दीयते। पुनः सप्तमे पाठ्यांशे गर्भस्य लिङ्गज्ञानस्य विषयास्तत्र प्रश्नकुण्डल्या गर्भे पुत्रकन्यानिर्णायकसूत्राणि च दीयन्ते। अष्टमे पाठ्यांशे च स्वरविधिना पुत्र-कन्यानिर्धारकतथ्याः निरूप्यन्ते। तदनु नवमे पाठ्यांशे सन्ततिहानिकरयोगः दशमे पाठ्यांशे द्रेष्काणचक्रेण पुत्रलाभयोगः तथा एकादशे पाठ्यांशे अभीष्टः सन्ततिः औरसादिषु कीदृशः स्यादितिज्ञानार्थं विषयाः निरूप्यन्ते। एवम्प्रकारेण अयं पाठः गर्भसम्बन्धितः पुत्रसम्बन्धितश्च तत्सम्बद्ध विषयाणां ज्ञानार्थं बहूपयोगी भविष्यति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१०.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- गर्भस्य दशमासेषु स्वरूपं तेषां मासाधिपतीश्च ज्ञातुं शक्ष्यति।
- अभीष्टः गर्भः कुशलः स्यान्नवा इति वक्तुं शक्ष्यति।
- गर्भस्य प्रसवः कदा भविष्यति इति निरूपयितुं शक्ष्यति।
- गर्भे पुत्रः कन्या वा इति निर्णेतुं शक्ष्यति।
- अभीष्टः सन्ततिः औरसः परजातः वेति ज्ञातुं पारयिष्यति।

१०.३ गर्भप्रश्नविचारः

पुत्रार्थिषु दम्पत्तिषु प्रायः स्व पुत्रसम्बन्धिचिन्ता भवत्येव। ते दैवज्ञं पृच्छन्ति यत् मम पुत्रः भविष्यति न वा, भविष्यति चेत् कीदृक्। पुत्रः भविष्यति कन्या वा। अथवा गर्भवतीनां स्त्रीणां प्रश्न गर्भरक्षा सम्बन्धितः भवति। एते गर्भसम्बन्धिताः वृत्तान्तप्रश्नाः गर्भप्रश्नाः भवन्ति। अस्मिन् प्रश्ने त्रयविषयाः प्रमुखतया विचारणीयाः भवन्ति। गर्भस्वरूपं, गर्भमासाधिपतिः तथा प्रश्नकुण्डल्यां पञ्चमभावस्य पञ्चमेशस्य च स्थितिः।

१०.३.१ गर्भस्वरूप

गर्भाधानकालात् प्रतिक्षणं गर्भस्याभिवृद्धिः भवति। परन्तु गर्भस्वरूपं निश्चयार्थं मासान्तरेण गर्भस्य स्थितिः निर्धारिता वर्तते। यथा- आधानकालात् पचतः गर्भस्य एकमासपर्यन्तं शुक्रशोणितयोः मिश्रितं कललस्वरूपं भवति। द्वितीये मासे घनपिण्डस्वरूपं निर्मितः भवति तस्य अण्डः इति संज्ञा भवति। तृतीये मासान्ते हस्तावयवादि अङ्गानि जायन्ते लिंगनिर्धारणं च भवति। चतुर्थे मासे अङ्गेषु अस्थिनिर्माणं भवति। पञ्चमे मासे त्वक् निर्माणं भवति। षष्ठे मासे रोमाः जायन्ते। सप्तमे मासे गर्भे मस्तिष्कविकासः भवति, तस्मिन् चेतनत्वं भवति। अष्टमे मासे गर्भस्थः शिशुः क्षुधामनुभवति सः च मातुर्भोजनात् रसस्य पानं करोति। नवमे मासे गर्भाशयात् बहिर्निगन्तुम् उद्वेगं करोति। पुनः दशममासस्य प्रारम्भे एव शिशोः जन्म भवति। एवम्प्रकारेण गर्भस्वरूपाः विद्वद्भिः निश्चिताः। उक्तञ्च सारावल्यां–

मासेष्वाधानादिषु गर्भस्य यथा क्रमेण जायन्ते।?
सप्तसु कललाण्डकशाखास्थित्वग्रोमचेतनताः॥
मासेऽष्टमे च तृष्णा क्षुधा च नवमे तथोद्वेगः।
दशमेत्वथ सम्पूर्णः पक्वमिव फलं पतति गर्भः॥

पदान्वयः – आधानादिषु सप्तसु मासेषु यथाक्रमेण गर्भस्य कलल-अण्ड-शाखा-अस्थि-त्वक्-रोम-चेतनताः जायन्ते। अष्टमे मासे च क्षुधा तृष्णा च तथा नवमे उद्वेगः, अथ दशमे तु सम्पूर्ण पक्वं फलमिव गर्भः पतति।

प्रतिपदार्थः – आधानादिषु = आधानकालात् आरभ्य सप्तसु मासेषु = सप्तमासं यावत् मासेषु, यथाक्रमेण = क्रमशः, गर्भस्य = गर्भपिण्डस्य कलल = शुक्रशोणितयोर्मिश्रणं, अण्डः = पिण्डस्वरूपं, शाखा = हस्तपादादिकम् अंगनिर्माणम्, अस्थि = अस्थिनिर्माणम्, त्वक् = त्वक्निर्माणम्, रोमः = रोमदर्शनम्, चेतनताः = मस्तिष्कविकासः, एते स्वरूपाः जायन्ते। अष्टमे मासे = गर्भाधानादष्टमे मासे, च, क्षुधा = बुभूक्षा, तृष्णा = पिपासा च, तथा नवमे = नवमे मासे, उद्वेगः, दशमे = दशमे मासे तु, अथ, सम्पूर्णं = पूर्णतया पक्वं फलम् इव, गर्भः = गर्भस्थः शिशुः, पतति = गर्भाद् बहिरायाति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सरलार्थः - आधानकालात् सप्तमासं यावत् क्रमेण प्रतिमासं कललस्वरूपं, पिण्डस्वरूपं, अङ्गनिर्माणम्, अस्थिनिर्माणम्, त्वङ्निर्माणम्, रोमनिर्माणम्, चेतनताश्च जायन्ते। पुनः गर्भाधानात् अष्टमे मासे शिशुः क्षुधातृष्णाद्यनुभवति, मातुर्भोजनात् रसस्य पानं च करोति, नवमे मासे गर्भाद्बहिर्निर्गमनार्थं चेष्टां करोति, पुनः दशमे मासे प्रारम्भे गर्भस्थः शिशुः गर्भाद्बहिरायाति।

१०.३.२ गर्भमासाधिपतयः

आधानकालात् आरभ्य प्रसवपर्यन्तं प्रतिमासानाम् अधिपतयः ग्रहाः भवन्ति। एते मासाधिपतयः ग्रहाः एव गर्भस्य स्थितिं निर्धारयन्ति। एतस्मिन् सन्दर्भे सारावल्यां निरूपितं वर्तते –

शुक्रारजीवरविशशिसौरबुधविलग्नोडुपादित्याः।
मासपतयः स्युरेतैर्गर्भस्य शुभाशुभं चिन्त्यम्॥

पदविच्छेदः – शुक्र आर जीव रवि शशि सौरि बुध विलग्नप उडुप आदित्याः मासपतयः स्युः एतैः गर्भस्य शुभाशुभं चिन्त्यम्॥

पदान्वयः – शुक्र-आर-जीव-रवि-शशि-सौरि-बुध-विलग्नप-उडुप-आदित्याः मासपतयः स्युः (अतः) एतैः गर्भस्य शुभाशुभं चिन्त्यम्।

प्रतिपदार्थः – शुक्रः = शुक्रग्रहः, आरः = भौमग्रहः, जीवः = गुरूग्रहः, रविः = सूर्यग्रहः, शशी = चन्द्रग्रहः, सौरि = शनिग्रहः, बुधः = बुधग्रहः, एते, मासपतयः = दशमासानाम् अधिपतयः, स्युः, एतैः, = उक्तग्रहैः, गर्भस्य = गर्भपिण्डस्य, शुभाशुभं = शुभत्वं अशुभत्वं च, चिन्त्यम् = ज्ञातव्यम्।

सरलार्थः – गर्भस्य दशमासानामधिपतयः क्रमेण प्रथममासस्य शुक्रः, द्वितीयस्य भौमः, तृतीयस्य गुरू, चतुर्थस्य सूर्यः, पञ्चमस्य सूर्यः, षष्ठस्य सूर्यः, सप्तमस्य बुधः अष्टमस्य आधानलग्नेशः, नवमस्य चन्द्रः, दशमस्य च सूर्यः इति भवन्ति। एतेषाम् अधिपतीनां शुभत्वाशुभत्वस्थितिं ज्ञात्वा प्रतिमासे गर्भस्य शुभाशुभस्थितिं ज्ञायते।

बोधप्रश्नाः

१. गर्भपिण्डे कस्मिन् मासे मस्तिष्कविकासः भवति?

२. गर्भस्य प्रसवः कस्मिन् मासे भवति?

३. गर्भकाले तृतीयमासस्य अधिपतिः कः ग्रहः भवति?

१०.४ गर्भक्षेमयोगः

गर्भसम्बन्धितप्रश्ने प्रश्नलग्नात् पञ्चमे शुभग्रहः स्यात् अथवा पञ्चमभावः पञ्चमेशेन दृष्टः स्यात् तथा प्रश्नकाले गर्भस्य यः मासः तस्य मासाधिपः बलवान् स्यात् तदा गर्भस्य कुशलत्वं ज्ञेयम्। उक्तं हि प्रश्नभूषणे –

पञ्चमे शुभसंयुक्ते स्वामिना च युतेक्षिते।
गर्भस्य कुशलं ज्ञेयं मासपे सबले बुधैः॥

पदविच्छेदः – पञ्चमे शुभसंयुक्ते स्वामिना च युते ईक्षिते गर्भस्य कुशलं ज्ञेयं मासपे सबले बुधैः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदान्वयः – पञ्चमे शुभसंयुक्ते स्वामिना युतेक्षिते च मासपे सबले बुधैः गर्भस्य कुशलं ज्ञेयम्।

प्रतिपदार्थः – पञ्चमे = पञ्चमभावे, शुभसंयुक्ते = शुभग्रहेण युक्ते, स्वामिना = स्व-अधिपतिग्रहेण (पञ्चमेशेन), युते = युक्ते, ईक्षिते = दृष्टे, च, मासपे = प्रश्नकालिके गर्भमासाधिपे, सबले = बलयुक्ते, गर्भस्य, कुशलं = शुभत्वं, बुधैः = विद्वद्भिः, ज्ञेयम् = ज्ञातव्यम्।

सरलार्थः – गर्भसम्बन्धिप्रश्नकाले पञ्चमभावे शुभग्रहेण युक्ते पञ्चमेशेन च दृष्टे, पुनः तात्कालिकगर्भमासाधिपतौ सबले सति गर्भस्य कुशलत्वं ज्ञेयम्।

१०.५ गर्भस्रावयोगः

गर्भसम्बन्धिप्रश्ने पञ्चमभावे पापग्रहः स्यात् तथा पञ्चमभावः पञ्चमेशेन वीक्षितः न स्यात्तर्हि गर्भस्य स्रावः भवति।

गर्भस्य कुशलप्रश्ने पञ्चमे पापखेचरः।
स्वस्वामिदृष्टिरहिते तदा गर्भच्युतिर्भवेत्॥

पदविच्छेदः – गर्भस्य कुशलप्रश्ने पञ्चमे पापखेचरः स्वस्वामिदृष्टिरहिते तदा गर्भच्युतिः भवेत्॥

पदान्वयः – गर्भस्य कुशलप्रश्ने पञ्चमे पापखेचरः (स्यात्) तथा तस्मिन् स्व-स्वामिदृष्टिरहिते तदा गर्भच्युतिः भवेत्॥

प्रतिपदार्थः – गर्भस्य कुशलप्रश्ने पञ्चमे पञ्चमभावे, पापखेचरः = पापग्रहः, स्यात्, तथा तस्मिन् = तस्मिन् पञ्चमभावे स्वस्वामिदृष्टिरहिते = पञ्चमभावस्य स्वामिनः दृष्टिरहिते, तदा गर्भच्युतिः = गर्भस्रावः भवेत्।

सरलार्थः – गर्भस्य कुशलाकुशलप्रश्नकाले पञ्चमभावे कश्चित् पापग्रहः स्यात्, पुनः पञ्चमेशेन दृष्टः न स्यात्तदा अभीष्टगर्भस्य स्रावः भवेत् इति चिन्त्यम्।

१०.५.१ गर्भस्यानिष्टयोगः

१०.६ गर्भप्रसवकालज्ञानम्

प्रश्नकुण्डल्या गर्भस्य प्रसवकालज्ञानार्थं प्रश्नभूषणे उक्तं वर्तते –

लग्नेशभुक्तभोग्यांशैर्भुक्ता भोग्याः क्रमाद्बुधैः।
मासा निरूपिताश्चास्य गर्भस्य कलया दिनम्॥

पदविच्छेदः – लग्नेश भुक्त भोग्यांशैः भुक्ताः भोग्याः क्रमात् बुधैः मासाः निरूपिताः च अस्य गर्भस्य कलया दिनम्॥

पदान्वयः – अस्य गर्भस्य लग्नेशभुक्तभोग्यांशैः भुक्ताः भोग्याः च मासाः कलयादिनं क्रमात् बुधैः निरूपिताः।

प्रतिपदार्थः – अस्य गर्भस्य = पृच्छकेन सम्बन्धितस्य गर्भस्य लग्नेशभुक्तभोग्यांशैः = लग्नेशस्य भुक्तनवांशैः भोग्यनवांशैः वा भुक्ताः भोग्याः च माः = गर्भस्य गतमासाः तथा

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्कालात् प्रसवमासः, कलया = नवांशे एव कलामानेन दिनम् = दिनसंख्या क्रमात् = क्रमशः बुधैः = विद्वांसैः, निरूपिताः = वर्णिताः।

सरलार्थः - प्रश्नकुण्डल्यां प्रश्नलग्नेशस्य भुक्तनवांशतुल्यमासाः तथा वर्तमाननवांशस्य भुक्तकलातुल्यानि दिनानि, अभीष्टगर्भस्य भुक्तमासादयो भवन्ति। पुनः प्रश्नलग्नेशस्य भोग्यनवांशतुल्यमासाः तथा वर्तमाननवांशस्य भोग्यकलातुल्यदिनानि अभीष्टगर्भस्य भोग्यमासादयः भवन्ति। सूत्रेण निरूप्यते चेत् -

$$\frac{\text{प्रश्नलग्नेशस्य स्पष्टांशादयः}}{3^0/20'} = \text{लब्धः गतनवांशः (गर्भस्य गतमासाः)}$$

$$\frac{\text{शेषम्} \times 60 + \text{कलामानं}}{3^0/20'} = \text{अंशादिमानम्}$$

अंशाः $\times 60 +$ कलाः $=$ कलामानम्

$$\frac{\text{कलामानम्} \times 3}{20} = \text{लब्धिः (गर्भस्य गत दिनादि)}$$

गर्भस्य गतमासाः + गर्भस्य गतदिनानि = गर्भस्य गतकालः

९ मासाः - गर्भस्य गतकालः = गर्भस्य भाविप्रसवकालमानम्

उदाहरणार्थं कश्चित् पृच्छकः गर्भसम्बन्धिप्रश्नं करोति। तस्य काल विवरणादिकं एवम् स्यात् -

प्रश्नदिनाङ्कः - ८-६-२०१३

प्रश्नसमयः - २:३६

प्रश्नस्थानम् - देहली

प्रश्नः - गर्भस्थितिज्ञानम्। अत्र चिन्ताविषयः - गर्भप्रसवः कदा भविष्यति?



स्पष्टग्रहादयः - लग्नम् - ६ॅ/१६°/४५'/२८''

सूर्यः - २ॅ/२२°/२०'/१२''

चन्द्रः - २ॅ/२३°/१०'/२१''

भौमः - २ॅ/२°/२६'/०९''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बुधः - २ॅ/२४°/३३'/२०''

गुरूः - २ॅ/८°/४३'/५७''

शुक्रः - ३ॅ/१८°/५३'/५१''

शनिः - ६ॅ/१०°/४५'/२५''

राहुः - ६ॅ/१९°/३४'/०३''

केतुः - ०ॅ/१९°/३४'/०३''

अधुना विचार्यते -

अस्मिन् काले प्रश्नलग्नम् तुला वर्तते लग्नेशश्च शुक्रः अस्ति। पूर्वोक्तनियमानुसारं लग्नेशस्य भुक्तनवांशादयः गर्भस्य गतमासादीन् तथा भोग्यनवांशादयः गर्भस्य ऐष्यमासादीन् निरूपयन्ति अतः -

लग्नेशः शुक्रः - ३ॅ/१८°/५३'/५१''

अतः ३०°/००'/००''

-१८°/५३'/५१'' (भुक्तांशादयः)

११°/०६'/०९'' (भोग्यांशादयः)

१. नवांश मानम् - ३°/२०'

३°/२०' = १ नवांशः

१८°/५४' = ५ नवांशः + २°/१४'

अत्र ५ नवांशाः लग्नेशस्य गताः अतः प्रश्नकाले गर्भस्य पञ्चमासाः व्यतीताः इति ज्ञातव्यम्/पुनः

२°/१४' = २ x ६०+०१४ = १३४'

$$\frac{134\times3}{20}=\frac{402}{20}=20^{0}/06$$

अतः गर्भस्य विंशति दिनानि गतानि सन्ति। एवमाहृत्य प्रश्नकाले गर्भस्य पञ्चमासाः विंशतिदिनानि च व्यतीतानि सन्ति। गर्भस्य गतमासाः + गर्भस्य गतदिनानि = गर्भस्य गतकालः ९ मासाः - गर्भस्य गतकालः = गर्भस्य भाविप्रसवकालमानम् इति ज्ञातव्यम् पुनश्च नवमासेषु गर्भस्य गतकालमानं विशोधनेन

9/00
-2/20

3/10

अतः अग्रे त्रिमासात् दशदिवसानन्तरं च अभीष्टगर्भस्य प्रसवः भविष्यति इति ज्ञेयम्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१०.६.१ प्रसवकालज्ञाने मतान्तरम्

अन्यनियमानुसारेण यदि प्रश्नकाले प्रश्नलग्नात् यावत्संख्यकभावानन्तरं शुक्रः स्यात्, प्रश्नदिनपर्यन्तं तावन्तः मासाः गताः भवन्ति। पुनः नवमासेभ्य ते मासाः विशोधनेन गर्भस्य प्रसवकालः भवति। यथोक्तं प्रश्नभूषणे –

यतमे लग्नतः शुक्रः स्थाने तावन्त एव हि।
गर्भस्य मासा विज्ञेया गता भोग्याश्च सूरिभिः॥

पदविच्छेदः – यतमे लग्नतः शुक्रः स्थाने तावन्त एव हि गर्भस्य मासाः विज्ञेया गताः भोग्याः च सूरिभिः।

पदान्वयः – लग्नतः यतमे स्थाने शुक्रः तावन्तः गर्भस्य गताः भोग्याश्च मासाः सूरिभिः विज्ञेयाः।

प्रतिपदार्थः – लग्नतः = प्रश्नलग्नात्, यतमे = यावत्संख्यके, स्थाने = भावे, शुक्रः = शुक्रग्रहः, तावन्तः = तावत्संख्याकाः, गर्भस्य = अभीष्टगर्भस्य, गताः = व्यतीताः, भोग्याश्च, मासाः, सूरिभिः = दैवज्ञैः, विज्ञेयाः = ज्ञातव्याः।

सरलार्थः – प्रश्नलग्नात् यावत्संख्यके भावे शुक्रः स्यात् तावत्संख्यकाः अभीष्टसंख्यकाः गर्भस्य प्रसवमासाः दैवज्ञैः ज्ञातव्याः।

विशेषम् – उक्तः योगः अप्रासङ्गिक इव सम्भवति। यतो हि प्रश्नकाले लग्नात् दशमे एकादशे द्वादशे वा भावेऽपि शुक्रः भवितुं शक्नोति, परन्तु गर्भकालः नवमासः एव विद्वद्भिः निश्चितः।

परन्तु भुवनदीपकस्य विज्ञानभाष्ये श्लोक सं. (६०) इत्यस्य भाष्ये उक्तं शुकदेवचतुर्वेदिना यत् यदि नवमभावतः अग्रे शुक्रः भवेत् तदा पञ्चमभावात् गतमासानां गणना कर्त्तव्या। अनेनैव उक्तशंकायाः समाधानं भवितुमर्हति।

बोधप्रश्नाः

४. प्रश्नलग्नात् पञ्चमे शुभग्रहः गर्भमासाधिपश्च बलवान् स्यात्तर्हि गर्भस्य --------। (कुशलत्वं ज्ञेयं/स्रावः ज्ञेयः)

५. पञ्चमभावे पापग्रहः स्यात् तदा गर्भस्य ------ भवति। (वृद्धिः/स्रावः)

१०.७ गर्भे पुत्र-कन्यानिर्णयः

द्वादशराशिषु (मेषादिक्रमेषु) विषमसंख्यकराशयः पुरूषराशयः भवन्ति, तथा समसंख्यकराशयः स्त्रीराशयो भवन्ति। तदनुसारमेव प्रश्नकाले यदि शनिः विषमराशौ स्यात्तर्हि पुत्रजन्म तथा शनिः समराशौ स्यात्तर्हि कन्याजन्म सामान्यया ज्ञातव्यम्। प्रश्नभूषणे उक्तं वर्तते–

ओजर्क्षे विषमांशे वा पुत्रजन्मकरः शनिः।
समांशे समभे पुत्रीकारको नात्र संशयः॥

पदविच्छेदः – ओज ऋक्षे विषमांशे वा पुत्रजन्मकरः शनिः सम अंशे समभे पुत्रीकारकः नात्र संशयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदान्वयः – शनिः ओजर्क्षे वा विषमांशे पुत्रजन्मकरः समांशे समभे पुत्रीकारकः अत्र संशयः न।

प्रतिपदार्थः – शनिः = शनिग्रहः, ओजर्क्षे = विषमराशौ, वा = अथवा विषमांशे= विषमनवांशे, पुत्रजन्मकरः = पुत्रस्य जन्मकरः, समांशे = समराशेः नवांशे, समभे = समराशौ, पुत्रीकारकः = पुत्र्यः जन्मकरः, अत्र = अस्मिन् सन्दर्भे, संशयः = काचित् शंका न = न भवति।

सरलार्थः – प्रश्नकाले यदि शनिः विषमराशौ विषमे नवांशे वा स्यात्तर्हि अभीष्टः गर्भः पुत्रजन्मकरः तथा च शनिः समराशौ समे नवांशे वा स्यात्तर्हि अभीष्टः गर्भः कन्याजन्मकरः भवति।

१०.७.१ ग्रहाणां स्थितिवशात् पुत्र-कन्या-जन्म-ज्ञानम्

(क) पुत्रजन्मज्ञानम् -

- प्रश्नकाले यदि सूर्य-चन्द्र-गुरवः विषमराशौ स्युः तदा पुत्रस्य जन्म भवति।
- प्रश्नकाले पञ्चमभावे शुक्र-चन्द्र-भौमानां दृष्टिः भवेत् तदा पुत्रस्य जन्म भवति।
- पञ्चमभावः शुक्रेन्दूभ्याम् अवलोकतौ भवेत् तदा गर्भात् पुत्रस्य जन्म भवति।
- प्रश्नकुण्डल्यां पञ्चमेशः लग्नेशश्च पुरूषसंज्ञकराशौ (विषमराशौ) स्यातां तदा पुत्रजन्म भवति।
- यदि पञ्चमेशः लग्ने लग्नेशश्च पञ्चमे भावे भवेत्, पुनश्च पूर्णः चन्द्रः पञ्चमे भावे स्यात्तर्हि पुत्रकारकः भवति।
- प्रश्नकाले लग्नेश-पञ्चमेशौ स्व-स्वोच्चभावयोः स्थित्वा अन्योन्यं पश्यतः तदा पुत्रस्य जन्म भवति।

(ख) कन्याजन्मज्ञानम् -

- प्रश्नकाले पञ्चमभावे शुक्र-चन्द्रौ स्यातां तदा कन्याजन्म ज्ञातव्यम्।
- प्रश्नकाले पञ्चमेश-लग्नेशौ स्त्रीराशौ (समराशौ) स्यातां तदा कन्याजन्म भवति।
- एते विषयाः प्रश्नभूषणे निरूपिताः सन्ति। तदेवम् –

सूर्यः सोमो गुरूश्चैव विषमे पुत्रकारकः।
शुक्रमङ्गलचन्द्राणां यदि दृष्टिः सुते सुतः॥

पदविच्छेदः – सूर्यः सोमः गुरूः च एव विषमे पुत्रकारकः शुक्र मङ्गल चन्द्राणां यदि दृष्टिः सुते सुतः॥

पदान्वयः – सूर्यः सोमः गुरूश्च यदि विषमे तदा पुत्रकारकः स्यात्। शुक्रमङ्गलचन्द्राणां यदि सुते दृष्टिः (भवेत्तदाऽपि) सुतः भवति।

प्रतिपदार्थः – सूर्य = सूर्यग्रहः, सोमः = चन्द्रग्रहः, गुरूः = गुरूग्रहः च,

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदि विषमे = विषमराशिषु, तदा पुत्रकारकः = पुत्रोत्पत्तिकारकः, स्यात्, शुक्रमङ्गलचन्द्राणां = उक्तग्रहाणां, यदि सुते = पञ्चमभावे, दृष्टिः भवेत् तदाऽपि, सुतः = पुत्रः, भवति।

सरलार्थः – प्रश्नकाले सूर्य-चन्द्र-गुरूग्रहाः विषमराशिषु स्युः तदा पुत्रोत्पत्तिकारकाः भवन्ति। तथैव शुक्र-मंगल-चन्द्राणाम् पञ्चमभावे दृष्टिः स्यात्तदाऽपि पुत्रजन्म भवति।

शुक्रचन्द्रौ पञ्चमस्थौ कन्याजन्कराविमौ।
पश्यतस्तौ सुतस्थानं पुत्रदौ बलिनौ यदि॥

पदविच्छेदः – शुक्रचन्द्रौ पञ्चमस्थौ कन्याजन्मकरौ इमौ पश्यतः तौ सुतस्थानं पुत्रदौ बलिनौ यदि॥

पदान्वयः – पञ्चमस्थौ शुक्रचन्द्रौ कन्याजन्मकरौ भवतः। तौ इमौ बलिनौ सुतस्थानं पश्यतः पुत्रदौ (भवतः)।

प्रतिपदार्थः – पञ्चमस्थौ = पञ्चमभावे स्थितौ, शुक्रचन्द्रौ = उक्तग्रहौ, कन्याजन्मकरौ= कन्यायाः जन्मकारकौ, भवतः, तौ, इमौ = शुक्रचन्द्रग्रहौ, बलिनौ = बलयुक्तौ, सुतस्थानं = पञ्चमभावं, पश्यतः पुत्रदौ = पुत्रस्य जन्मकारकौ भवतः।

सरलार्थः – गर्भप्रश्नकाले पञ्चमभावगतौ शुक्रचन्द्रौ कन्यायाः जन्मकारकौ भवतः। इमौ एव शुक्रचन्द्रौ बलिनौ पञ्चमभावं पश्यतः तदा पुत्रस्य जन्मकारकौ भवतः।

नीचास्तारिगतौ तौ चेत्सन्तानं न वदेद् बुधः।
लाभगौ बलिनावेतौ पुत्रदौ प्रश्नलग्नतः॥

पदविच्छेदः – नीच अस्त अरिगतौ तौ चेत् सन्तानं न वदेत् बुधः लाभगौ बलिनौ एते पुत्रदौ प्रश्नलग्नतः॥

पदान्वयः – तौ (चन्द्रशुक्रौ) चेत् नीचास्तारिगतौ (तदा) बुधः संन्तानं न वदेत् एतौ बलिनौ लाभगौ पुत्रदौ (भवतः)।

प्रतिपदार्थः – तौ = उक्तौ, चन्द्रशुक्रौ, चेत्, नीचास्तारिगतौ = स्वनीचराशौ, अस्तम् अथवा स्वशत्रुगृहे गतौ स्यातां तदा, बुधः = विद्वान्, सन्तानं = पुत्रं न वदेत्, एतौ = उक्तौ ग्रहौ (चन्द्रशुक्रौ), बलिनौ = बलयुक्तौ, लाभगौ = एकादशभावगतौ, (तदा) पुत्रदौ = पुत्रदायकौ, भवतः।

सरलार्थः – गर्भप्रश्ने यदि चन्द्रशुक्रौ नीचराशौ, अस्तौ, अथवा स्वशत्रुराशौ स्यातां तर्हि सन्तानाभावं, गर्भहानिः वा विद्वान् वदेत्। परन्तु उक्तग्रहौ बलिनौ भूत्वा एकादशभावे गतौ स्यातां तदा पुत्रदौ भवतः।

सन्तानभवनाधीशः प्रश्नलग्नाधिपस्तथा।
द्वावेव नरराशिस्थौ पुत्रः स्त्रीराशिगौ सुता॥

पदविच्छेदः – सन्तानभवनाधीशः प्रश्नलग्नाधिपः तथा द्वौ एव नरराशिस्थौ पुत्रः स्त्रीराशिगौ सुता।

पदान्वयः – सन्तानभवनाधीशः तथा प्रश्नलग्नाधिपः द्वावेव यदि नरराशिस्थौ (तदा) पुत्रः, स्त्रीराशिगौ, सुता (भवति)।

प्रतिपदार्थः – सन्तानभवनाधीशः पञ्चमभावस्य स्वामी तथा प्रश्नलग्नाधिपः प्रश्नलग्नस्य स्वामी, द्वावेव उक्तौ द्वौ एव, यदि, नरराशिस्थौ = पुरूषराशिगतौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(मेष-मिथुन-सिंह-तुला-धनु-कुम्भराशिषु कुत्रचित्) तदा पुत्रः = पुत्रस्य जन्म स्त्रीराशिगौ = वृष-कर्क-कन्या-वृश्चिक-मकर-मीनराशिषु क्वचित् गतौ, सुता = कन्यायाः जन्म भवति।

सरलार्थः – प्रश्नकाले पञ्चमभावस्य स्वामी, लग्नेशश्च एतौ द्वौ पुरूषराशौ गतौ स्यातां तदा पुत्रस्य जन्म, तथा स्त्रीराशौ गतौ स्यातां तदा कन्यायाः जन्म ज्ञातव्यम्।

प्रश्नकालेऽङ्गपुत्रेशौ निजोच्चे भवतो यदि।
तयोः परस्परं दृष्टिस्तदा पुत्रं विनिद्रिशेत्॥

पदविच्छेदः – प्रश्नकाले अङ्ग-पुत्रेशौ यदि निजोच्चे (स्यातां) तयोः परस्परं दृष्टिः भवतः तदा गर्भात् पुत्रजन्म ज्ञातव्यम्।

विशेषम् – योगोऽयं वृश्चिकलग्ने अथवा धनुलग्ने सामान्यतः सम्भवति। यतो वृश्चिकलग्ने लग्नेशः मंगलः, तस्योच्चं मकरराशिः भवतित, पंचमेशश्च गुरुः, तस्योच्चं कर्कराशिः भवति। मकरस्थः मंगलः कर्कस्थः गुरुश्च परस्परं द्रष्टुं शक्नुतः। तद्यथा –



तथैव धनुलग्ने लग्नेशः गुरुः, तस्योच्चं कर्कराशिः, पंचमेशः मंगलः, तस्योच्चं मकरराशिः च भवति। कर्कस्थः गुरुः मकरस्थः मंगलः च परस्परं द्रष्टुं शक्नुतः। तद्यथा–



१०.८ प्रश्नकाले स्वरविधिना पुत्र-पुत्रीज्ञानम्

प्रश्नकाले कुण्डल्यभावे स्वरज्ञानपूर्वकं कथं दैवज्ञः गर्भे पुत्र-कन्याज्ञानं कुर्यात्। इत्यस्मिन् विषये प्रश्नभूषणे उक्तं वर्तते यत् –

प्रश्नकाले दैवज्ञः स्वनासिकास्वरं निरीक्षेत्। तत्र यदि दक्षिणस्वरः प्रवहति तदा गर्भे पुत्रः। तथा च वामस्वरः प्रवहति तदा गर्भे कन्यायाः स्थितिः दैवज्ञः ज्ञायेत्। यथा –

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वहमाना यदा नाडी दक्षिणा पुत्रसम्भवः।
वामनाडी तदा पुत्री वहमाना विशेषतः॥

पदान्वयः – यदा दक्षिणा नाडी विशेषतः वहमाना (भवेत्तदा) पुत्रसम्भवः। यदा वामनाडी तदा पुत्री भवेदिति।

प्रतिपदार्थः – यदा, दक्षिणनाडी = नासिकायाः दक्षिणस्वरः, विशेषतः = विशेषप्रकारेण, वहमाना भवेत् = चलति, तदा, पुत्रसम्भवः = पुत्रस्य जन्म भवति। यदा, वामनाडी = नासिकायाः वामस्वरः चलति, तदा, पुत्री = कन्यायाः जन्म, भवति।

सरलार्थः – प्रश्नकाले दैवज्ञस्य नासिकायाः दक्षिणस्वरः चलति तदा पुत्रस्य जन्म भवति। तथैव यदा वामस्वरः चलति तदा कन्यायाः जन्म भवति।

१०.९ सन्ततिहानिकरयोगः

प्रश्नकाले यदि पञ्चमेशः निर्बलः भवेत् अर्थात् पञ्चमेशः अस्तङ्गतः, नीचस्थः, शत्रुराशिस्थः अथवा पापग्रहेण युक्तः दृष्टो वा स्यात्तदा सन्ततेः जन्मतः अरिष्टं मृत्युं वा वक्तव्यम्। उक्तं हि प्रश्नभूषणे –

अस्तांशे पञ्चमाधीशे नीचे वा खलपीडिते।
पुत्रो न जायते तस्य भवत्यपि न जीवति॥

पदच्छेदः – अस्तांशे पञ्चमाधीशे नीचे वा खलपीडिते तस्य पुत्रो न जायते। भवत्यपि न जीवति।

प्रतिपदार्थः – पञ्चमाधीशे = पञ्चमभावस्य स्वामिने, अस्तांशे = अस्तं गते, वा = अथवा, नीचे = स्वनीचराशौ, खलपीडिते = पापग्रहेण युक्ते, तस्य = पृच्छकस्य, पुत्रो न जायते = पुत्रः न भवति, भवत्यपि यदि भवति तर्हि न जीवति।

सरलार्थः – प्रश्नकाले पञ्चमेशे अस्तं गते अथवा स्वनीचराशौ गते पापग्रहेण युक्ते वा सति पृच्छकस्य पुत्रो न भवति। यदि भवति तदा शीघ्रं म्रियते।

पुनः उच्यते –

पञ्चमेशो यदा युक्तो राहुणा वा कुजेन वा।
तदा सन्तानहानिः स्यादित्युक्तं पूर्वसूरिभिः॥

पदविच्छेदः – पञ्चमेशः यदा युक्तः राहुणा वा कुजेन वा तदा सन्तानहानिः स्यात् इति उक्तं पूर्वसूरिभिः॥

पदान्वयः – पञ्चमेशः यदा राहुणा वा कुजेन वा युक्तः तदा सन्तानहानिः स्यादिति पूर्वसूरिभिः उक्तम्।

प्रतिपदार्थः – पञ्चमेशः = पञ्चमभावस्य स्वामी, यदा, राहुणा = राहुग्रहेण, वा = अथवा, कुजेन = भौमेन, वा युक्तः, तदा, सन्तानहानिः = पुत्रस्य नाशः स्यात्, इति पूर्वसूरिभिः = प्राचीनैः विद्वद्भिः उक्तम्।

सरलार्थः – प्रश्नकाले पञ्चमेशः यदा राहुग्रहेण अथवा भौमेन युक्तः स्यात् तदा पृच्छकस्य पुत्रनाशं भवति, इति प्राचीनैः विद्वद्भिः उक्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

६. विषमसंख्यकराशयः पुरुषराशयः भवन्ति स्त्रीराशयो वा?

७. प्रश्नकाले शनिः विषमराशौ भवेत्तदा पुत्रजन्म भवति कन्याजन्म वा वा?

८. पञ्चमभावे शुक्रचन्द्रौ स्यातां तदा कस्य जन्म ज्ञातव्यम्?

९. प्रश्नकाले दैवज्ञस्य दक्षिणस्वरः प्रवहेत् तदा गर्भे किं ज्ञातव्यम्?

१०.१० द्रेष्काणेन पुत्रलाभयोगज्ञानम्

प्रश्नकाले लग्नेशपञ्चमशौ द्वावपि पञ्चमभावसंस्थितौ स्यातां, द्रेष्काणचक्रेऽपि एकस्मिन्नेव भावे गतौ स्यातां तदा पृच्छकस्य अनायासमेव विनाऽऽधिकपरिश्रमात् पुत्रलाभः भवति। प्रश्नभूषणस्य द्रेष्काणप्रश्नाध्याये निरूपितं वर्तते –

एवं लग्नेशपुत्रेशावेकद्रेष्काणसंस्थितौ।
पञ्चमे पुत्रलाभः स्यादनायासेन पृच्छतः॥

पदविच्छेदः – एवम् लग्नेश पुत्रेशौ एक द्रेष्काण संस्थितौ पञ्चमे पुत्रलाभः स्यात् अनायासेन पृच्छतः॥

पदान्वयः – एवं = अनेन प्रकारेण, लग्नेश पुत्रेशौ = लग्नस्य, पञ्चमभावस्य च स्वामी, पञ्चमे = पञ्चमभावे, एकद्रेष्काणसंस्थितौ = एकस्मिन्नेव द्रेष्काणे स्थितौ स्यातां, तदा पृच्छतः = प्रश्नात् अनायासेन = विनाऽऽधिकपरिश्रमेण पुत्रलाभः = पुत्रस्य प्राप्तिः स्यात्।

सरलार्थः – प्रश्नकाले लग्नेशपञ्चमेशौ पञ्चमभावे एकस्मिन्नेव द्रेष्काणे स्थितौ स्यातां तदा विनाऽधिकपरिश्रमेणैव पृच्छकं पुत्रप्राप्तिः भवति।

१०.११ औरसादिपुत्रयोगः

पुत्रप्राप्तिसम्बन्धिप्रश्ने यदि पापग्रहाः स्थिरे लग्ने स्युः तदा औरसपुत्रः (स्वपतिना उत्पन्नः) भवति। तथैव स्थिरे लग्ने शुभ पापग्रहाः मिश्रिताः स्युः तदा पृच्छकस्य परजातपुत्रः भवति। उक्तं हि प्रश्नभूषणे –

पापग्रहाः स्थिरे लग्ने स्वपतेः पुत्रसम्भवः।
शुभाशुभाः स्थिरे लग्ने मिश्रितः पुत्रसम्भवः॥

पदविच्छेदः – पापग्रहाः स्थिरे अग्ने स्वपतेः पुत्रसम्भवः शुभाशुभाः स्थिरे लग्ने मिश्रितः पुत्रसम्भवः॥

पदान्वयः – पापग्रहाः स्थिरे लग्ने स्वपतेः पुत्रसम्भवः स्थिरे लग्ने शुभाशुभाः मिश्रितः पुत्रसम्भवः॥

प्रतिपदार्थः – पापसंज्ञकग्रहाः (भौम-शनि-राहुकेतवः) स्थिरे लग्ने = लग्ने स्थिरराशौ (वृष-सिंह-वृश्चिक-कुम्भेषु), स्वपतेः पुत्रसम्भवः = स्वपतिना उत्पन्नः पुत्रः भवति। स्थिरे लग्ने = स्थिरराशौ लग्ने एव शुभाशुभाः = शुभाशुभमिश्रग्रहाः सन्ति तदा, मिश्रितः पुत्रसम्भवः = जारजः पुत्रः भवति।

सरलार्थः – पुत्रचिन्ताप्रश्ने स्थिरलग्नं स्यात् तत्र च पापग्रहाः स्युः तदा स्वपतिना उत्पन्नः पुत्रः भवति, परन्तु स्थिरे लग्ने एव शुभाशुभमिश्रिताः ग्रहाः स्युः तदा परजातपुत्रः भवति इति दैवज्ञः जानीयात्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुनश्च उच्यते –

कुजो मन्दः सुतस्थानं प्रपश्यति यदा तदा।
चन्द्रदृष्टिं विना तत्र जारजातः सुतो मतः॥

पदान्वयः – यदा सुतस्थानं कुजः मन्दः (च) प्रपश्यति तदा तत्र चन्द्रदृष्टिं विना जारजातः सुतः मतः।

प्रतिपदार्थः – यदा, सुतस्थानं = पञ्चमभावं, कुजः = भौमः, मन्दः = शनिः च, प्रपश्यति = अवलोकयति, तदा तत्र = पञ्चमभावे, चन्द्रदृष्टिं विना = चन्द्रमसः दृष्ट्यभावे, सति, जारजातः = परपुरुषोत्पन्नः, सुतः = पुत्रः, मतः = दैवज्ञानां मतः वर्तते इति।

सरलार्थः – प्रश्नकाले यदि पञ्चमभावं भौमः शनिः च पश्यति, तथा तत्र पञ्चमभावोपरि चन्द्रमसः दृष्टिः न स्यात् तर्हि अभीष्टः पुत्र परपुरुषोत्पन्नः भवति इति दैवज्ञानां मतः वर्तते।

चन्द्रादित्यौ खलाक्रान्तावङ्गं जीवो न पश्यति।
कलाहीनो यदा चन्द्रस्तदा गर्भः परोद्भवः॥

पदविच्छेदः – चन्द्रः आदित्यौ खलाक्रान्तौ अङ्गं जीवः न पश्यति कलाहीनः यदा चन्द्रः तदा गर्भः परोद्भवः॥

पदान्वयः – चन्द्रादित्यौ खलाक्रान्तौ जीवः अङ्गं न पश्यति (पुनः) यदा कलाहीनः चन्द्रः तदा परोद्भवः गर्भः स्यात्।

प्रतिपदार्थः – चन्द्रादित्यौ = चन्द्रसूर्यौ, खलाक्रान्तौ = पापग्रहेण युक्तौ, जीवः गुरुः, अङ्गं = प्रथमभावं, न पश्यति = नावलोकयति, पुनः = एतस्यां परिस्थितौ, यदा, कलाहीनः = अल्परश्मियुक्तः (क्षीणः), चन्द्रः, तदा परोद्भवः = परपुरुषेण उत्पन्नः, गर्भः गर्भस्थः सन्तानः स्यात्।

सरलार्थः – प्रश्नकाले चन्द्रसूर्यौ पापग्रहयुक्तौ स्यातां, गुरुः प्रथमभावं नावलोकयति, पुनश्च चन्द्रः अल्परश्मियुक्तः स्यात् तदा अभीष्टः गर्भः परपुरूषेण उत्पादितः भवति इति।

निर्देशः – प्रश्नकाले दैवज्ञः औरसादिपुत्राणां स्वयमेव ज्ञानं कुर्यात्, परन्तु पृच्छकं न वदेत् इति। आचारविरूद्धत्वात्।

बोधप्रश्नाः

१०. केनयोगेन पृच्छकं अनायासं पुत्रलाभं भवति?

११. सन्तान पृच्छायां स्थिरे लग्ने पापग्रहाः स्युः तदा परजातः पुत्रः भवति सत्यम् असत्यं वा?

मूलपाठः

पञ्चमे शुभसंयुक्ते स्वामिना च युतेक्षिते।
गर्भस्य कुशलं ज्ञेयं मासपे सबले बुधैः॥

गर्भस्य कुशलप्रश्ने पञ्चमे पापखेचरः।
स्वस्वामिदृष्टिरहिते तदा गर्भच्युतिर्भवेत्॥

पञ्चमे यदि पापानां संयोगे वा विलोकनम्।
तदोत्पातं विजानीयात् गुरुदृष्टिं विना बुधः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लग्नेशभुक्तभोग्यांशैर्भुक्ता भोग्याः क्रमाद्बुधैः।
मासा निरूपिताश्चास्य गर्भस्य कलया दिनम्॥

यतमे लग्नतः शुक्रः स्थाने तावन्त एव हि।
गर्भस्य मासा विज्ञेया गता भोग्याश्च सूरिभिः॥

ओजर्क्षे विषमांशे वा पुत्रजन्मकरः शनिः।
समांशे समभे पुत्रीकारको नात्र संशयः॥

सूर्यः सोमो गुरुश्चैव विषमे पुत्रकारकः।
शुक्रमङ्गलचन्द्राणां यदि दृष्टिः सुते सुतः॥

शुक्रचन्द्रौ पञ्चमस्थौ कन्याजन्मकराविमौ।
पश्यतस्तौ सुतस्थानं पुत्रदौ बलिनौ यदि॥

नीचास्तारिगतौ तो चेत्सन्तानं न वदेद् बुधः।
लाभगौ बलिनावेतौ पुत्रदौ प्रश्नलग्नतः॥

सन्तानभवनाधीशः प्रश्नलग्नाधिपस्तथा।
द्वावेव नरराशिस्थौ पुत्रः स्त्रीराशिगौ सुता॥

प्रश्नकालेऽङ्गपुत्रेशौ निजोच्चे भवतो यदि।
तयोः परस्परं दृष्टिस्तदा पुत्रं विनिद्रिशेत्॥

वहमाना यदा नाडी दक्षिणा पुत्रसम्भवः।
वामनाडी तदा पुत्री वहमाना विशेषतः॥

अस्तांशे पञ्चमाधीशे नीचे वा खलपीडिते।
पुत्रो न जायते तस्य भवत्यपि न जीवति॥

पञ्चमेशौ यदा युक्तो राहुणा वा कुजेन वा।
तदा सन्तानहानिः स्यादित्युक्तं पूर्वसूरिभिः॥

एवं लग्नेशपुत्रेशावेकद्रेष्काणसंस्थितौ।
पञ्चमे पुत्रलाभः स्यादनायासेन पृच्छतः॥

पापग्रहाः स्थिरे लग्ने स्वपतेः पुत्रसम्भवः।
शुभाशुभाः स्थिरे लग्ने मिश्रितः पुत्रसम्भवः॥

कुजो मन्दः सुतस्थानं प्रपश्यति यदा तदा।
चन्द्रदृष्टिं विना तत्र जारजातः सुतो मतः॥

चन्द्रादित्यौ खलाक्रान्तावङ्गं जीवो न पश्यति।
कलाहीनो यदा चन्द्रस्तदा गर्भः परोद्भवः॥

१०.१२ सारांशाः

सुहृच्छात्रः! भवता पाठोऽयं "गर्भक्षेमप्रश्नविचारः" पठितः। पाठेऽस्मिन् गर्भस्य कुशलाऽकुशलज्ञानविषयाः तथा गर्भे पुत्रकन्या स्थित्यादि ज्ञानार्थं विषयाः निरूपिताः। तत्रादौ गर्भस्य दशमासेषु स्वरूपं तथा प्रतिमासे गर्भाधिपतयः वर्णिताः। आधानकालादारभ्य प्रतिमासे कलल-पिण्ड-अङ्ग-अस्थि-त्वक्-लोम-चेतनत्वं-क्षुधानुभवः- उद्वेगः-प्रसवः एते गर्भे परिवर्तनं

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जायते। एतेषां क्रमेण शुक्र-भौम-गुरू-सूर्य-चन्द्र-शनि-बुधा-आधानलग्नेश-चन्द्र-सूर्यग्रहा एते मासाधिपतयः भवन्ति। एतेषु यस्य मासस्य अधिपतिः निर्बलः भवति गर्भस्य तत्सम्बन्धि-अङ्गे विकृतिः सञ्जायते। तथैव गर्भक्षेमप्रश्ने यदि प्रश्नकुण्डल्यां पञ्चमभावः शुभग्रहेण युतः पञ्चमेशेन दृष्टः स्यात् पुनः प्रश्नकालिकगर्भमासाधिपः बलयुक्तः भवेत् तदा गर्भस्य कुशलत्वं ज्ञेयम्। परन्तु यदि पञ्चमेशः पापग्रहेण युक्तः स्यात् पञ्चमेशेन न दृष्टः युतो वा स्यात्तदा गर्भस्य च्युतिः ज्ञातव्यम्। गर्भस्य प्रसवकालज्ञानार्थमुच्यते यत् प्रश्नकुण्डल्यां प्रश्नलग्नेशस्य भुक्तनवांशतुल्यमासाः तथा वर्तमानवांशस्य भुक्तकलातुल्यदिनानि गर्भस्य व्यतीतकालमानानि भवन्ति। नवभिः विशोधनेन गर्भस्य गतकालमानेन प्रसवकालं समागच्छति। एकेन अन्यनियमानुसारेण प्रश्नकाले यावत्संख्यके भावे शुक्रः स्यात् तावत्संख्यकाः अभीष्टगर्भस्य गतमासाः तथा नवोनिता गतमासतुल्या प्रसवमासाः भवन्ति। अत्र यदि शुक्रः प्रश्नकुण्डल्यां नवमभावादग्रे स्यात्तदा गतमासादीनां गणना पञ्चमभावात् क्रियते। गर्भे पुत्र-कन्यानिर्णयविधौ उक्तं यत् प्रश्नकाले शनिः विषमराशौ स्यात्तर्हि पुत्रजन्म तथा समराशौ स्यात्तर्हि कन्याजन्म ज्ञातव्यम्। पुनः सूर्यचन्द्रगुरवः विषमराशौ स्युः अथवा पञ्चमभावे शुक्रचन्द्रभौमानां दृष्टिः भवेत् पञ्चमभावं शुक्रेन्दू अवलोकयतौ स्यातां, पञ्चमेशलग्नेशौ पुरूषसंज्ञकराशौ स्यातां, पञ्चमेशः लग्ने लग्नेशश्च पञ्चमे स्व-स्वोच्चभावयोः स्थित्वा अन्योन्यं पश्यतः स्यातां तदा पुत्रजन्म ज्ञातव्यम्। तथा च यदि पञ्चमभावे शुक्रचन्द्रौ स्याताम् अथवा पञ्चमेश-लग्नेशौ स्त्रीराशौ स्यातां तदां कन्याजन्म ज्ञातव्यम् स्वरशास्त्रानुसारेण ज्ञायते चेत् यदि प्रश्नकाले दैवज्ञस्य स्वरशास्त्रानुसारेण नासिकायाः दक्षिणस्वरः प्रवहति तदा पुत्रस्य तथा वामस्वरः प्रवहति तदा कन्यायाः जन्म ज्ञायेत। प्रश्नकाले केचन अशुभाः योगाः अभीष्टसन्ततेः नष्टसूचकाः भवन्ति। ते निरूपिताः यथा – प्रश्नकाले पञ्चमेशः निर्बलः स्यात्तदा अभीष्टसन्ततेः नाशः भवति। तत्रोक्तं यत् "अस्तांशे पञ्चमाधीशे नीचे वा खलपीडिते। पुत्रो न जायते तस्य भवत्यपि न जीवति" तथैव प्रश्नकाले पञ्चमेशः राहुणा भौमेन वा युक्तः स्यात्तदाऽपि पुत्रस्य हानिः भवेदिति। अग्रे निरूपितः यत् प्रश्नकाले लग्नेशपञ्चमेशौ द्वावपि पञ्चमभावे स्थितौ एकस्मिन्नेव द्रेष्काणे स्यातां तदा पृच्छकम् अनायासमेव पुत्रलाभः भवति। औरसादिपुत्रज्ञानसन्दर्भे उक्तं यत् पुत्रचिन्तायां प्रश्नकाले यदि स्थिरलग्ने पापग्रहाः स्युः तदा औरसपुत्रः भवति। तथैव स्थिरलग्ने शुभ-पापमिश्रिताः ग्रहाः स्युः तदा परजातः पुत्रः ज्ञातव्यः। पुनः पञ्चमभावः भौमशनीभ्यां वीक्षितः स्यात् तत्र चन्द्रस्य दृष्टिः न स्यादथवा चन्द्रादित्यौ पापग्रहेण युक्तौ स्यातां, गुरूः प्रथमभावं नावलोकयेत् चन्द्रश्चाल्परश्मियुतः तदा अभीष्टः गर्भः परपुरुषोत्पादितः भवति इति दैवज्ञः विचिन्तयेत्। एवम्प्रकारेण गर्भजातसम्बन्धिते प्रश्ने प्रश्नकुण्डल्यां विविधरहस्यानां ज्ञानार्थं पाठोऽयम् निरूपितः।

१०.१२ शब्दावली

१.	दम्पत्तिः	=	पति-पत्नी।
२.	गर्भक्षेमः	=	गर्भस्य कुशलत्वम्।
३.	गर्भच्युतिः	=	असमये एव गर्भस्य स्रावः।
४.	सोमः	=	चन्द्रः।
५.	सूरिभिः	=	विद्वद्भिः।
६.	औरसः	=	स्वपतिना उत्पादितः।
७.	परजातः	=	परपुरूषेण उत्पादितः।
८.	जारजातः	=	जारपुरूषेण उत्पादितः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१०.१३ सन्दर्भग्रन्थः

१. प्रश्नभूषणम् (दैवज्ञजीवनाथ झा विरचितं), आचार्यः गुरूप्रसादगौडः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।

१०.१४ सहायकग्रन्थः

१. प्रश्नवैष्णवः, पं. श्री उमाकान्त झा, नागप्रकाशक जवाहर नगर, दिल्ली।

२. षट्पञ्चाशिका, डॉ. सत्येन्द्रमिश्रः, चौखम्बा संस्कृत संस्थान, वाराणसी।

३. भुवनदीपकः (विज्ञानभाष्यम्), शुकदेव चतुर्वेदी, रंजन पब्लिकेशन, दरियागंज नई दिल्ली।

१०.१५ बोधप्रश्नोत्तराणि

१. सप्तमे मासे।

२. दशमे मासे।

३. गुरूः।

४. कुशलत्वं ज्ञेयम्।

५. स्रावः।

६. पुरूषराशयः।

७. पुत्रस्य।

८. कन्याजन्म।

९. पुत्रः

१०. लग्नेशपञ्चमेशौ पञ्चमभावे संस्थितौ एकद्रेष्काणगौ च स्यातां तदा अनायासं पुत्रलाभः भवति।

११. असत्यं यतोहि, स्थिरे लग्ने पापग्रहाः स्युः तदा औरसपुत्रः भवति।

१०.१६ अभ्यासप्रश्नाः

१. गर्भस्य दशमासानामधिपतयः लेख्याः।

२. गर्भस्य प्रसवकालज्ञानार्थं सूत्रं निरूपयत।

३. प्रश्नकाले पुत्रजन्मसूचकाः त्रयो योगाः लेख्याः।

४. प्रश्नकाले कन्याजन्मसूचकं योगद्वयं लेख्यम्।

—•—

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकादशः पाठः – रोगिप्रश्नविचारः

पाठसंरचना

११.१ प्रस्तावना
११.२ उद्देश्यम्
११.३ रोगप्रश्नविचारः
११.३.१ रोगप्रश्ने विचारणीयाः भावाः
बोधप्रश्नाः
११.४ रोगिणः मरणयोगः
११.४.१ मृत्युतुल्यकष्टयोगः
११.४.२ मरणामरणयोगः
११.४.३ मरणाभावयोगः
बोधप्रश्नाः
११.५ रोगनिर्णयः
११.६ भूतप्रेतजन्यकष्टयोगाः
बोधप्रश्नाः
मूलपाठः
११.७ सारांशः
११.८ शब्दावली
११.९ सन्दर्भग्रन्थाः
११.१० सहायकग्रन्थाः
११.११ बोधप्रश्नोत्तराणि
११.१२ अभ्यासप्रश्नाः

११.१ प्रस्तावना

प्रश्नभूषणस्य एकादशे पाठे रोगिप्रश्नविचारे भवतः स्वागतम्। यदि कश्चिद् व्यक्तिः रोगग्रस्तः स्यात्तदा तस्य परिजनः दैवज्ञं रोगिविषयकं चिन्तामधिकृत्य रोगी आरोग्यलाभं प्राप्स्यति न वा, अथवा असाध्यरोगः, रोगेण मृत्युः भविष्यति वा न वा इत्यादिकं प्रश्नान् पृच्छति। एते प्रश्नाः रोगप्रश्नाः भवन्ति। रोगप्रश्ने प्रश्नकुण्डल्या समाधानार्थं परामर्शदानार्थञ्च अयं पाठः निरूप्यते। अस्मिन् पाठे रोगप्रश्ने विचारणीयानां भावानां निदर्शनपूर्वकम् कस्मात् भावात् रोगि–उपचार–ओषध्यादिकं विचार्यते इति स्पष्टीक्रियते। अस्य पाठस्य चतुर्थे पाठ्यांशे रोगिणः मरणयोगः, मृत्युतुल्यकष्टयोगः तथा मरणाभावयोगः निरूप्यते। पञ्चमे पाठ्यांशे रोगनिर्णयविधिः दीयते। ततः अन्ते रोगोत्पत्तौ भूतप्रेतादिभिः उत्पन्नानां रोगकारकानां विषये वर्ण्यते। एवं प्रकारेण पाठेऽस्मिन् रोगिविषयकचिन्तायां बहुविधानां प्रश्नानां समाधानार्थं विषयाः दीयन्ते।

११.२ उद्देश्यम्

एतस्य पाठस्य अध्ययनेन भवान् –

- रोगिणः मृत्युः भविष्यति न वा इति ज्ञातुं शक्ष्यति।
- रोगी आरोग्यतां प्राप्स्यति न वा इति निर्देष्टुं शक्ष्यति।
- रोगी कीदृग्रोगेण ग्रस्त इति निर्णेतुं समर्थः भविष्यति।
- रोगी भूत–प्रेतजन्यरोगेण ग्रस्तः वा इति ज्ञातुं शक्ष्यति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

११.३ रोगप्रश्नविचारः

''शरीरं व्याधिमन्दिरम्'' उक्तिरियं तु प्रसिद्धा एव वर्तते। भौतिकेऽस्मिन् प्रपञ्चे प्रायः सर्वे जनाः केनचिद्रोगेण ग्रस्ता एव भवन्ति। तथापि कश्चिद्रोगः असह्यः भवति तथा तस्य रोगस्य प्रभावः अधिकतरः यदा दृश्यते, तदैव जातकः रोगी इति संज्ञां प्राप्नोति। तदा रुग्णस्य परिजनः रोगमुक्तिः कदा भविष्यति, किमुपायं कर्त्तव्यं, रोगी आरोग्यतां प्राप्स्यति न वा, अथ वा असाध्ये रोगे सति रोगिणः मृत्युः भविष्यति वेति शङ्काधारितान् प्रश्नान् पृच्छति। एते रोगिणः सम्बन्धिताः प्रश्नाः रोगप्रश्नाः कथ्यन्ते। एतेषां रोगप्रश्नानां सम्यग्विचार्य उत्तरं देयं भवति।

११.३.१ रोगप्रश्ने विचारणीयाः भावाः

कुण्डल्यां षष्टः रोगभावः निश्चित एव। तथा च सप्तम-अष्टमभावौ मृत्युभावौ कथ्येते। भावाद्भावं विचार्यमिति नियमात् द्वितीयद्वादशभावावपि रोगप्रश्ने विचारणीयौ भवतः। अतः प्रश्नकुण्डल्यां लग्नेन सह द्वितीय-षष्ठ-सप्तम-अष्टम-द्वादशभावाः विचारणीयाः भवन्ति। प्रश्नभूषणाख्ये ग्रन्थे तु इतोऽपि उक्तं वर्तते, यत् प्रश्नकुण्डल्यां चतुर्थभावः रोगिणः सप्तमभावः व्याधेः, दशमभावः औषधेः लग्नंश्च चिकित्सकस्य भावः भवति। अतः उक्तभावानां बलाबलं शुभत्वाशुभत्वं च विचार्य रुग्णस्य निरोगत्वं रोगस्य प्राबल्यं औषधेः गुणं चिकित्सकस्य योग्यतादिकं विचार्यते।

तत्रोक्तं –

सुखागारं रोगी दशमभवनं त्वौषधगृहम्
रुगस्तं वैद्योऽङ्गं सकलमिति विज्ञाय गणकः
बलाक्रान्तौ वैद्यौषधगृहपतौ प्रश्नसमये
तदा भद्रं विद्यादिह हि तद्भावेन कुशलम्॥

पदविच्छेदः – सुखागारं रोगी दशमभवनं तु औषधगृहम् रुक् अस्तं वैद्यः अङ्गं सकलं इति विज्ञाय गणकः बलाक्रान्तौ वैद्यऔषधगृहपतौ प्रश्नसमये तदा भद्रं विद्यात् इह हि तद् अभावे न कुशलम्॥

पदान्वयः – सुखागारं रोगी, दशमभवनं तु औषधगृहम्, अस्तं रुक्, अङ्गं वैद्यः, सकलं विज्ञाय गणकः (वदेत्)। प्रश्नसमये वैद्यौषधगृहपतौ बलाक्रान्तौ भद्रं विद्यात्। इह तदभावे हि कुशलं न वाच्यम्।

प्रतिपदार्थः – सुखागारं = चतुर्थभावं, रोगी = रुग्णस्य भावं, दशमभवनं = दशमभावं, तु, औषधगृहम् = औषधेः भावं, अस्तं = सप्तमभावं, रुक् = रोगभावं, अङ्गं = प्रथमभावं, वैद्यः = चिकित्सकः, सकलं = एतत् सर्वं, विज्ञाय = ज्ञात्वा, गणकः = दैवज्ञः, वदेत्। प्रश्नसमये = प्रश्नकाले, वैद्यौषधगृहपतौ = वैद्यस्य औषधेश्च गृहस्वामिनौ, बलाक्रान्तौ = बलयुक्तौ, (तदा) भद्रं = कल्याणं (रुग्णस्य आरोग्यं) विद्यात्, इह = अत्र, तदभावे = वैद्यस्य औषधेश्च स्वामिनां बलहीने कुशलं न वाच्यम् = न कल्याणमिति, ज्ञातव्यम्।

सरलार्थः – कुण्डल्यां चतुर्थभावं रोगिणः स्थानं, दशमभावम् औषधगृहम्, सप्तमं रोगभावं तथा लग्नं वैद्यस्य स्थानं विज्ञाय दैवज्ञः फलादेशं कुर्यात्। तत्र च प्रश्नकाले वैद्यौषधगृहपतौ (लग्नेशदशमेशयोः) बलयुक्ते सति रुग्णस्य आरोग्यं (कल्याणं) तथा तेषां बलहीने सति अकुशलं ज्ञातव्यम्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



बोधप्रश्नाः

१. कुण्डल्यां रोगभावः कः निश्चितः?

२. प्रश्नकुण्डल्यां रोगिणः स्थानं किं भवति?

३. केन भावेन औषधेः विचारः भवति?

११.४ रोगिणः मरणयोगः

रोगिप्रश्नकाले यदि लग्ने पापग्रहस्य राशिः (मेष-वृश्चिक-मकर-कुम्भेषु अन्यतमः) स्यात्, अथवा चन्द्रः पापग्रहयोर्मध्ये स्यात्, अथवा लग्न-सप्तम-द्वादश-अष्टमभावेषु पापग्रहाः स्युः तदा रोगिणः मरणं ज्ञातव्यम्। प्रश्नभूषणे एते योगाः विस्तरेण विवेचिताः। तद्यथा –

प्रश्नलग्नोपगं पापभं रोगिणः पापयुक्तेक्षितं चाष्टमर्क्षं यदा।
पापयोरन्तरे पापयुक्तोऽष्टमे चन्द्रमा मृत्युयोगो भवेत्सत्वरम्॥

पदविच्छेदः – प्रश्नलग्नोपगं पापभं रोगिणः पापयुक्तेक्षितं च अष्टम ऋक्षं यदा पापयोः अन्तरे पापयुक्तः अष्टमे चन्द्रमा मृत्युयोगः भवेत् सत्वरम्॥

पदान्वयः – यदा पापभं प्रश्नलग्नोपगं भवेत्, अष्टमर्क्षं पापयुक्तेक्षितं (स्यात्) पापयुक्तः चन्द्रमा अष्टमे च तदा सत्वरं मृत्युयोगो भवेत्।

प्रतिपदार्थः – यदा पापभं = पापग्रहस्य राशिः (शनिभौमो पापग्रहौ तयोः राशयश्च मकरकुम्भमेषवृश्चिकाः पापराशयः भवन्ति), प्रश्नलग्नोपगं = प्रश्नलग्ने, भवेत्, अष्टमर्क्षं = अष्टमभावः, पापयुक्तेक्षितं = पापग्रहेण युक्तः दृष्टो वा, स्यात्, पापयुक्तः चन्द्रमा = पापग्रहेण युक्तः चन्द्रः, अष्टमे = अष्टमभावे, च, तदा = उक्तयोगे सति, सत्वरं = शीघ्रं, मृत्युकारकः योगः, भवेत्।

सरलार्थः – प्रश्नकुण्डल्यां यदि लग्ने पापग्रहस्य राशिः भवेत्, अष्टमभावः पापग्रहेण युक्तः दृष्टो वा भवेत्तथा अष्टम एव भावे पापग्रहेण युक्तः चन्द्रः स्यात् तदा रूग्णस्य शीघ्रमेव मृत्युः ज्ञातव्यम्।

प्रश्नलग्नक्षणे पापखेटा व्यये नैधने चन्द्रमा वा नगे लग्नभे।
नैधने शत्रुभे सत्वरं रोगिणो मृत्युयोगस्तदा व्यत्यये व्यत्ययः॥

पदविच्छेदः - प्रश्नलग्नक्षणे पापखेटाः व्यये नैधने चन्द्रमा वा नगे लग्नभे नैधने शत्रुभे सत्वरं रोगिणो मृत्युयोगः तदा व्यत्यये व्यत्ययः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदान्वयः – प्रश्नलग्नक्षणे पापखेटाः व्यये, चन्द्रमा नैधने, वा पापखेटाः नगे, (चन्द्रमा) लग्नभे, (अथवा) पापग्रहाः अष्टमे (चन्द्रमा) शत्रुभे तदा रोगिणः सत्वरं मृत्युयोगः स्यात्। व्यत्यये व्यत्ययः (भवति)।

प्रतिपदार्थः – प्रश्नलग्नक्षणे = प्रश्नकाले, पापखेटाः = पापग्रहाः, व्यये = द्वादशभावे, चन्द्रमा = चन्द्रग्रहः, नैधने = अष्टमभावे, वा = अथवा, पापखेटाः = पापग्रहाः, नगे = सप्तमभावे, चन्द्रमा, लग्नभे = प्रथमभावे, अथवा, पापग्रहाः, अष्टमे = अष्टमभावे, चन्द्रमा = चन्द्रग्रहः, शत्रुभे = षष्ठे भावे, तदा, रोगिणः = रूग्णस्य सत्वरं = शीघ्रं, मृत्युयोगः = मृत्युसूचकयोगः, स्यात्। व्यत्यये = विपरीते, व्यत्ययं = विपरीतः, भवति।

सरलार्थः – श्लोकेऽस्मिन् त्रयो योगाः निरूपिताः वर्तन्ते –

१. प्रश्नकाले यदि पापग्रहाः लग्नात् द्वादशभावे स्युः चन्द्रश्च अष्टमे भावे स्थितः स्यात् तदा रोगिणः शीघ्रमेव मृत्युः ज्ञातव्यम्।



२. प्रश्नकाले पापग्रहाः सप्तमे भावे स्युः तथा चन्द्रमा लग्ने स्यात्तदा रोगिणः शीघ्रं मृत्युः भवेत्।

३. पापग्रहाः अष्टमे स्युः चन्द्रश्च षष्ठे भावे स्यात्तदा रोगिणः शीघ्रं मृत्युः भवेत्।



पुनः कथ्यते –

चन्द्रे लग्ने कलत्रेऽर्के शीघ्रं रोगी विनश्यति।
कौर्प्यशे मेषभे भौमे चन्द्रयुक्ते च नश्यति॥

पदविच्छेदः – चन्द्र लग्ने कलत्रे अर्के शीघ्रं रोगी विनश्यति कौर्प्यशे मेषभे भौमे चन्द्रयुक्ते च नश्यति॥

पदान्वयः – चन्द्र लग्ने अर्के कलत्रे रोगी शीघ्रं विनश्यति। चन्द्रयुक्ते भौमे मेषभे कौर्प्यशे च (रुग्णः) शीघ्रं नश्यति।

प्रतिपदार्थः – चन्द्रे = चन्द्रग्रहे, लग्ने = प्रथमभावे गते, अर्के = सूर्यग्रहे, कलत्रे =

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्तमभावे स्थिते, रोगी, शीघ्रं विनश्यति = शीघ्रमेव मृत्युं प्राप्नोति। चन्द्रयुक्ते = चन्द्रग्रहेण युक्ते भौमे = मंगलग्रहे, मेषभे = मेषराशौ, कौर्प्यशे = वृश्चिकराशेः नवांशे, च , रुग्णः = रोगी, शीघ्रं नश्यति = शीघ्रमेव मृत्युं प्राप्नोति।

सरलार्थः – प्रश्नकाले यदि प्रथमभावे चन्द्रः स्यात् सप्तमे भावे च सूर्यः स्यात्तदा अभीष्टरोगी शीघ्रमेव मृत्युं प्राप्नोति। यथा कुण्डल्यां –



अथवा चन्द्रेणयुक्तः भौमः लग्नचक्रे मेषराशौ तथा नवांशचक्रे मेषराशौ भवेत्तदापि रोगी शीघ्रं मृत्युं प्राप्नोति। यथा –

लग्नचक्रम्



नवांशचक्रम्



द्वाविंशतिदृकाणस्थः प्रश्नलग्नेश्वरो यदि।
तदा मृत्युं विजानीयादवश्यं रोगिणो बुधः॥

पदविच्छेदः – द्वाविंशतिदृकाणस्थः प्रश्नलग्नेश्वरः यदि तदा मृत्युं विजानीयात् अवश्यं रोगिणः बुधः॥

पदान्वयः – प्रश्नलग्नेश्वरः यदि द्वाविंशतिदृकाणस्थः तदा रोगिणः अवश्यं मृत्युं बुधः विजानीयात्।

प्रतिपदार्थः – प्रश्नलग्नेश्वरः = प्रश्नलग्नस्य स्वामी, यदि, द्वाविंशतिदृकाणस्थः = द्वाविंशतितमे द्रेष्काणे स्यात् (एकस्मिन् राशौ त्रयः द्रेष्काणाः भवन्ति, तदनुपातेन २२/३ = ७ लब्धिः ०१ शेषम्, अतः सप्तमराश्यनन्तरम् अष्टमराशेः वृश्चिकराशेः प्रथमे द्रेष्काणे स्यात्), तदा, रोगिणः = रोगिजनस्य, अवश्यं = निश्चये, मृत्युं मरणं, बुधैः, विजानीयात्।

सरलार्थः – प्रश्नकाले लग्नेशः यदि वृश्चिकराशेः प्रथमद्रेष्काणे स्यात्तदा अभीष्टरोगिणः निश्चयेन मृत्युः दैवज्ञः विजानीयात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशेषः – उक्तेषु योगेषु ये ग्रहाः राशयश्च निश्चिताः ते कस्मिन्नपि भावे भवितुं शक्नुवन्ति।

लग्नचक्रम्



द्रेष्काणचक्रम्



विशेषः – उक्तेषु योगेषु ये ग्रहाः राशयश्च निश्चिताः ते कस्मिन्नपि भावे भवितुं शक्नुवन्ति।

११.४.१ मृत्युतुल्यकष्टयोगः

रोगिविषयकचिन्तायां यदि प्रश्नलग्नात् सप्तमे पापग्रहः स्यात् तदा रोगिणार्थं न शुभं भवति। तथा तत्र यदि शुभपापग्रहौ मिश्रितौ स्यातां तदा रोगी केवलं मृत्युतुल्यं कष्टं प्राप्नोति। पुनश्च लग्नेशः पापग्रहेण युक्तः स्यात्तदापि रोगी मृत्युतुल्यं कष्टं प्राप्नोति। उक्तञ्च प्रश्नभूषणे –

प्रश्नलग्नाद्यदा सप्तमे सद्युते रोगिणः भद्रमुक्तं न पापग्रहैः।
मिश्रखेटैर्विमिश्रं फलं सूरिभिस्तत्र लग्नेश्वरे पापयुक्ते मृतिः॥

पदविच्छेदः – प्रश्नलग्नात् यदा सप्तमे सत् युते रोगिणः भद्रं उक्तं न पापग्रहैः मिश्रखेटैः विमिश्रं फलं सूरिभिः तत्र लग्नेश्वरे पापयुक्ते मृतिः॥

पदान्वयः – यदा प्रश्नलग्नात् सप्तमे सद्युते रोगिणः भद्रम् सप्तमे पापग्रहयुक्ते भद्रं न। मिश्रखेटैः विमिश्रं फलं, लग्नेश्वरे पापयुक्ते तत्र मृतिः सूरिभिः उक्तम्।

प्रतिपदार्थः – यदा, प्रश्नलग्नात् = प्रश्नकुण्डल्यां लग्नस्थानात्, सप्तमे = सप्तमभावे, सद्युते = शुभग्रहेण युक्ते, रोगिणः = रोगिजनस्य, भद्रं = कल्याणं स्वास्थ्यलाभमिति भावः, सप्तमे = सप्तमभावे, पापग्रहयुक्ते = पापग्रहेण युक्ते, भद्रं न = स्वास्थ्यलाभं न (कष्टम्), मिश्रखेटैः = शुभ-पापमिश्रग्रहैः, विमिश्रं = मिश्रितं फलम् (मृत्युतुल्यं कष्टमेव), लग्नेश्वरे = प्रथमभावाधिपे, पापयुक्ते = पापग्रहेण युक्ते, तत्र = रोगप्रश्ने, मृतिः = रोगिजनस्य मृत्युः, सूरिभिः = विद्वद्भिः, उक्तम्।

सरलार्थः – रोगिसम्बन्धिप्रश्नकाले प्रश्नलग्नात् सप्तमे भावे शुभग्रहे सति रोगिजनस्य स्वास्थ्यलाभं कल्याणञ्च ज्ञातव्यम्। परन्तु सप्तमे पापग्रहेण युक्ते कल्याणं न भवति

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्थात् मृत्युपर्यन्तं रोगः चलति। तथैव शुभपापमिश्रितैः ग्रहैः सप्तमभावे सति मृत्युतुल्यं कष्टं भवति। प्रश्नकाले लग्नेशे पापग्रहेण युक्तेऽपि कष्टं ज्ञातव्यम्।

११.४.२.मरणामरणयोगः

रोगिप्रश्नविचारणे लग्नेशो बलहीनः स्यात् अष्टमेशश्च बलयुक्तः स्यात् पुनः चन्द्रे षष्ठे अथवा अष्टमे भावे गते सति रोगिणः मृत्युः भवति। परन्तु लग्नेशः उदितः बलयुक्तश्च स्यात् तथा अष्टमेशो बलहीनः स्यात् लाभेशश्च बली भवेत्तदा रोगी दीर्घायुं प्राप्नोति। मतमिदं प्रश्नभूषणे एवम् उक्तं वर्तते –

लग्नपो दुर्बलो मृत्युनाथो बली शत्रुभे नैधने शीतभानौ मृतिः।
लग्नपश्चोदितो मृत्युपो दुर्बलो लाभपो वीर्ययुक्तश्चिरञ्जीवनम्॥

पदविच्छेदः – लग्नपः दुर्बलः मृत्युनाथः बली शत्रुभे नैधने शीतभानौ मृतिः लग्नपः च उदितः मृत्युपः दुर्बलः लाभपः वीर्ययुक्तः चिरं जीवनम्॥

पदान्वयः – लग्नपः दुर्बलः मृत्युनाथः बली (तदा) शत्रुभे नैधने च शीतभानौ मृतिः। लग्नपः उदितः मृत्युपः दुर्बलः, लाभपः (च) वीर्ययुक्तः (तदा) चिरञ्जीवनं वाच्यम्।

प्रतिपदार्थः – लग्नपः = लग्नेशः, दुर्बलः = बलहीनः, मृत्युनाथः = अष्टमेशः, बली = बलयुक्तः (तदा) शीतभानौ = चन्द्रे, शत्रुभे = षष्ठे भावे (वा) नैधने = अष्टमभावे, मृतिः = मृत्युः भवति। लग्नपः = लग्नेशः, उदितः, मृत्युपः = अष्टमभावस्य स्वामी, दुर्बलः = बलहीनः, लाभपः = एकादशभावस्य स्वामी, च वीर्ययुक्तः = बलयुक्तः, तदा, चिरञ्जीवनम् = दीर्घायुः, वाच्यम् = वक्तव्यम्।

सरलार्थः – प्रश्नकाले लग्नेशः बलहीनः तथा अष्टमेशः बलयुक्तः स्यात्तदा चन्द्रः षष्ठे अथवा अष्टमे भावे भवेत्तर्हि रोगिणः मृत्युः भवति। यदि लग्नेशः उदितः स्यात् (अस्तं न गतः स्यात्) रोगी दीर्घायुः भवति।

११.४.३ मरणाभावयोगः

प्रश्नकाले लग्नेशाष्टमेशौ लग्ने स्यातां एकस्मिन्नेव द्रेष्काणेऽपि तदा रोगिणः मृत्युं न वक्तव्यम्। यथा –

लग्नचक्रम्



द्रेष्काणचक्रम्



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन्नुदाहरणे लग्नेशः चन्द्रः अष्टमेशश्च शनिः लग्ने स्थितौ तथा द्वावपि कर्कराशेः तृतीये द्रेष्काणे गत्वा द्रेष्काणचक्रे मीनराशौ स्थितौ स्याताम् एतादृगवस्थायां रोगिप्रश्ने रोगिणः मृत्युः न भवति। एवमन्यत्रापि ज्ञातव्यम्।

प्रश्नभूषणकारः वदत्येवं –

लग्नाष्टमपती लग्ने स्थितावेकत्र रोगिणाम्।
दृक्काणे मरणं न स्यादित्युक्तं पूर्वसूरिभिः॥

पदच्छेदः – लग्नाष्टमपती लग्ने स्थितौ एकत्र रोगिणाम् दृक्काणे मरणं न स्यात् इति उक्तम् पूर्वसूरिभिः॥

पदान्वयः – लग्नाष्टमपती लग्ने स्थितौ दृक्काणे एकत्र भवेतां तदा रोगिणः मरणं न स्यादिति पूर्वसूरिभिः उक्तम्।

प्रतिपदार्थः – लग्नाष्टमपती = लग्नेश-अष्टमेशौ, लग्ने = प्रथमभावे, स्थितौ, दृक्काणे = द्रेष्काणचक्रे एकत्र = एकस्मिन्नेव स्थाने, भवेतां तदा रोगिणः = रुग्णस्य मरणं = मृत्युः न, स्यात् इति पूर्वसूरिभिः = प्राचीनैः विद्वांसैः उक्तम्।

सरलार्थः – प्रश्नकाले यदि लग्नेशाष्टमेशो प्रथमभावे स्थितौ भूत्वा एकस्मिन्नेव द्रेष्काणे स्थितौ भवेतां तदा रुग्णस्य मृत्युः न स्यादिति प्राचीनविद्वद्भिः उक्तम्।

अपवादः – प्रोक्तात् विपरीतमुच्यते यत् लग्नेशाष्टमेशौ एकद्रेष्काणगौ अपि लग्नचक्रे अष्टमभावे स्यातां तदा रोगिणः मृत्युः भवत्येव। यथोक्तं हि –

तावेव निधने स्यातामेकद्रेष्काणगौ यदि।
तदा मृत्युर्भवेदेव रोगिणो नात्र संशयः॥

पदविच्छेदः – तौ एव निधने स्याताम् एकद्रेष्काणगौ यदि तदा मृत्युः भवेत् एव रोगिणः न अत्र संशयः॥

पदान्वयः – तौ एव यदि निधने एकद्रेष्काणगौ स्यातां तदा रोगिणः मृत्युः भवेदेव, अत्र न संशयः।

प्रतिपदार्थः – तौ एव = लग्नेश-अष्टमेशौ एव यदि, निधने = अष्टमभावे, एकद्रेष्काणगौ = एकस्मिन्नेव द्रेष्काणे गतौ स्यातां तदा रोगिणः = रोगिजनस्य मृत्युः भवेत् एव अत्र = अस्मिन् विषये न संशयः = शंका न करणीया इति भावः।

सरलार्थः – प्रश्नकाले तौ एव लग्नाष्टमेशौ अष्टमभावे स्थित्वा अष्टमभावस्य एकस्मिन्नेव द्रेष्काणे गतौ स्यातां तदा रोगिजनस्य मृत्युः भवति। अस्मिन् विषये संशयः नास्ति।

बोधप्रश्नाः

४. प्रश्नलग्ने पापराशिः स्यात् तथा अष्टमभावे पापग्रहः स्यात्तदा रोगिणः किं भवति?

५. प्रश्नकाले पापग्रहाः सप्तमे स्युः चन्द्रश्च लग्ने भवेत्तदा रोगिणः किं भवति?

६. रोगिप्रश्ने लग्नेशः पापग्रहेण युक्तः स्यात्तदा किं ज्ञातव्यम्?

७. लग्नेशाष्टमेशौ लग्ने एकद्रेष्काणगौ तदा रोगिप्रश्ने किं वक्तव्यम्?

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

११.५ रोगनिर्णयः

रोगिप्रश्नविचारकाले रोगी केन रोगेण ग्रस्तः अस्ति इति ज्ञानार्थं केन ग्रहेण अथ केन योगेन कः रोगः इति निरूप्यते –

रक्तपित्तप्रकोपो दिनेशोऽष्टमे भूसुतो वा बुधः सन्निपातस्तदा।
कुष्ठरोगोऽष्टमे राहुयुक्तो रविः षष्ठगो वा महाकुष्ठरोगप्रदः॥

पदच्छेदः – रक्तपित्तप्रकोपः दिनेशः अष्टमे भुसुतः वा बुधः सन्निपातः तदा कुष्ठरोगः अष्टमे राहुयुक्तः रविः षष्ठगः वा महाकुष्ठरोगप्रदः॥

पदान्वयः – दिनेशः वा भूसुतः अष्टमे तदा रक्तपित्तप्रकोपः, बुधेऽष्टमे सन्निपातः, राहुयुक्तो रविः अष्टमे (तदा) कुष्ठरोगः वा षष्ठगः महाकुष्ठरोगप्रदः।

प्रतिपदार्थः – दिनेशः = सूर्यः, वा = अथवा, भूसुतः = भौमः, अष्टमे = अष्टमभावे स्यात् तदा रक्तपित्तप्रकोपः = रक्तपित्तप्रकोपात् उत्पन्नः रोगः बुधे = बुधग्रहे, अष्टमे = अष्टमभावे सति सन्निपातः = सन्निपातनामकः रोगः, राहुयुक्तः रविः = राहुणा युक्तः सूर्यः अष्टमे = अष्टमभावे (तदा) कुष्ठरोगः = कुष्ठनामकः रोगः वा = अथवा षष्ठगः = षष्ठभवगतः महाकुष्ठरोगप्रदः = एतन्नामधेयः रोगप्रदः भवति।

सरलार्थः – प्रश्नकाले सूर्यः अथवा भौमः यदि अष्टमे भावे स्यात्तदा रक्तपित्तरोगः भवति। यदि बुधः अष्टमभावे स्यात्तदा सन्निपातरोगः भवति। राहुणा युक्तः सूर्यः यदि अष्टमभावे स्यात्तदा कुष्ठरोगः भवेत्। पुनः राहुणा युक्तः एव सूर्यः भावे स्यात्तदा महाकुष्ठरोगः ज्ञातव्यः।

पुनः उच्यते –

अष्टमे राहुणा संयुतः सूर्यजो वातरोगेण पादादिकम्पस्तदा।
सन्निपातः कविश्चन्द्रयुक्तोऽष्टमे वीर्यहीनः सपापो महारोगकृत्॥

पदविच्छेदः – अष्टमे राहुणा संयुतः सूर्यजः वातरोगेण पादादिकम्पः तदा सन्निपातः कविः चन्द्रयुक्तः अष्टमे वीर्यहीनः सपापः महारोगकृतः॥

पदान्वयः – राहुणा संयुतः सूर्यजः अष्टमे तदा वातरोगेण पादादिकम्पः। चन्द्रयुक्तः कविः अष्टमे तदा सन्निपातः, (स एव कविः) वीर्यहीनः सपापः (तदा) महारोगकृद् (भवेत्)।

प्रतिपदार्थः – राहुणा = राहुग्रहेण, संयुतः = युक्तः, सूर्यजः = शनिः, अष्टमे = अष्टमभावे तदा, वातरोगेण = वातसम्बन्धिरोगेण पादादिकम्पः = हस्त-पादादीनां कम्पनं भवति। चन्द्रयुक्तः = चन्द्रग्रहेण युक्तः, कविः = शुक्रः, अष्टमे = अष्टमभावे स्यात्, तदा, सन्निपातः = सन्निपातनामकः रोगः, स एव कविः = शुक्रः, वीर्यहीनः = बलहीनः, सपापः = पापग्रहेण युक्तः स्यात् तदा महारोगकृद् = असाध्यरोगकारकः भवेत्।

सरलार्थः – यदि प्रश्नकाले राहुग्रहेण युक्तः शनिः अष्टमभावे स्यात्तदा वातरोगेण ग्रस्तत्वात् हस्त-पादादीनां कम्पनं भवति। चन्द्रग्रहेण युक्तः शुक्रः अष्टमभावे स्यात्तदा सन्निपातरोगः भवति। तथा अष्टमभावे एव स्थितः शुक्रः बलहीनः पापग्रहेण युक्तः स्यात्तदा असाध्यरोगाः भवन्ति। इति दैवज्ञः विचिन्तयेत्।

११.६ भूत-प्रेतजन्यकष्टयोगाः

रोगीसम्बन्धिप्रश्नकाले लग्ने अथवा अष्टमभावे राहुः स्यात्तदा कृत्यया प्रेरितेन पिशाचादिना

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कष्टः ज्ञातव्यः। तथैव लग्ने अथवा अष्टमे स्थितेन शनियुक्तकेतुना अपि भूत-प्रेतादिना उत्पन्नः रोगः निश्चेतव्यः। उक्तं हि प्रश्नभूषणाख्ये ग्रन्थे –

अष्टमे वा तनुस्थाने राहौ कृत्याभवो गदः।
भूतायो वा मन्देन युते केतावपि ध्रुवम्॥

पदविच्छेदः – अष्टमे वा तनुस्थाने राहौ कृत्याभवः गदः भूतामयः वा मन्देन युते केतौ अपि ध्रुवम्॥

पदान्वयः – अष्टमे वा तनुस्थाने राहौ कृत्याभवः गदः, वा मन्देन युते केतौ अपि भूतामयः (गदः) ध्रुवम् (भवति)।

प्रतिपदार्थः – अष्टमे = अष्टमभावे, वा = अथवा, तनुस्थाने = लग्नभावे, राहौ = राहुग्रहे सति कृत्याभवः = कृत्यया (पिशाचादिसाधकीयोगिन्या)। उत्पादितः, गदः = कष्टः (रोगाः), वा = अथवा, मन्देन = शनिना, युते = युक्ते, केतौ = केतुग्रहे सति, अपि, भूतामयः = भूत-प्रेतादिना उत्पादितः, गदः = कष्टः, ध्रुवं = निश्चयेन भवति।

सरलार्थः – प्रश्नकाले अष्टमभावे अथवा लग्ने राहुः स्यात्तदा रोगिविषये कृत्यया (पिशाचादीनां साधक्या) उत्पादितः कष्टः भवति। अथवा प्रश्नकाले शनिना युक्तः केतुः लग्ने वा अष्टमे स्यात्तदा अपि भूतप्रेतजन्यः कष्टः ज्ञातव्यः इति।

बोधप्रश्नाः

८. रोगिप्रश्ने सूर्येऽष्टमे सति कः रोगः भवति?

९. प्रश्नकाले राहुयुक्तः सूर्यः षष्ठे भावे स्यात्तदा कः रोगः भवति?

१०. रोगप्रश्ने अष्टमभावगतेन राहुणा कीदृशं कष्टं निश्चेतव्यम्?

मूलपाठः

सुखागारं रोगी दशमभवनं त्वौषधगृहम्
रुगस्तं वैद्योऽङ्गं सकलमिति विज्ञाय गणकः॥

बलाक्रान्तौ वैद्यौषधगृहपतौ प्रश्नसमये
तदा भद्रं विद्यादिह हि तदभावे न कुशलम्॥

प्रश्नलग्नोपगं पापभं रोगिणः पापयुक्तेक्षितं चाष्टमर्क्षं यदा।
पापयोरन्तरे पापयुक्तोऽष्टमे चन्द्रमा मृत्युयोगो भवेत्सत्वरम्॥

प्रश्नलग्नक्षणे पापखेटा व्यये नैधने चन्द्रमा वा नगे लग्नभे।
नैधने शत्रुभे सत्वरं रोगिणो मृत्युयोगस्तदा व्यत्यये व्यत्ययः।

चन्द्रे लग्ने कलत्रेऽर्के शीघ्रं रोगी विनश्यति।
कौर्प्यांशे मेषभे भौमे चन्द्रयुक्ते च नश्यति॥

द्वाविंशतिदृकाणस्थः प्रश्नलग्नेश्वरो यदि।
तदा मृत्युं विजानीयादवश्यं रोगिणो बुधः॥

प्रश्नलग्नाद्यदा सप्तमे सद्युते रोगिणः भद्रमुक्तं न पापग्रहैः।
मिश्रखेटैर्विर्मिश्रं फलं सूरिभिस्तत्र लग्नेश्वरे पापयुक्ते मृतिः॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लग्नपो दुर्बलो मृत्युनाथो बली शत्रुभे नैधने शीतभानौ मृतिः।
लग्नपश्चोदितो मृत्युपो दुर्बलो लाभपो वीर्ययुक्तश्चिरञ्जीवनम्॥

लग्नाष्टमपती लग्ने स्थितावेकत्र रोगिणाम्।
दृक्काणे मरणं न स्यादित्युक्तं पूर्वसूरिभिः॥

तावेव निधने स्यातामेकद्रेष्काणगौ यदि।
तदा मृत्युर्भवेदेव रोगिणो नात्र संशयः॥

रक्तपित्तप्रकोपो दिनेशोऽष्टमे भूसुतो वा बुधः सन्निपातस्तदा
कुष्ठरोगोऽष्टमे राहुयुक्तो रविः षष्ठगो वा महाकुष्ठरोगप्रदः॥

अष्टमे राहुणा संयुतः सूर्यजो वातरोगेण पादादिकम्पस्तदा।
सन्निपातः कविश्चन्द्रयुक्तोऽष्टमे वीर्यहीनः सपापो महारोगकृतः॥

अष्टमे वा तनुस्थाने राहौ कृत्याभवः गदः।
भूतामयो वा मन्देन युते केतावपि ध्रुवम्॥

११.७ सारांशः

भवता "रोगिप्रश्नविचारः" इत्याख्यः पाठः अधीतः। अयं पाठः प्रश्नकुण्डल्या रोगिणाम् आरोग्यादिकं ज्ञानार्थम् उपयुक्तः आसीत्। अस्मिन् पाठे आदौ रोगप्रश्ने विचारणीयानां भावानामुल्लेखः कृतः। तत्र रोगस्य प्रश्ने लग्न-द्वितीय-षष्ठ-सप्तम-अष्टमभावाः विचारणीयाः भवन्ति। पुनःनिर्दिष्टं यत् रोगिप्रश्नविचारे प्रथमभावात् वैद्यस्य चतुर्थभावात् रोगिणः, सप्तमभावाद्रोगस्य तथा दशमभावात् ओषधेः विचारः कार्यः। पुनः रोगिणः मरणयोगाः उक्ताः। यदि प्रश्नकाले पापग्रहाः द्वादशभावे स्युः चन्द्रश्चाष्टमभावे स्थितः स्यात् अथवा पापाः सप्तमे, चन्द्रश्च लग्ने स्याद्वा पुनः पापग्रहाः अष्टमे चन्द्रश्च षष्ठे भावे स्यात्तदा रोगिणः शीघ्रं मृत्युः भवेत्। पुनः उक्तम् प्रश्नलग्ने चन्द्रः स्यात् सप्तमे भावे सूर्यः स्यात्तदाऽपि रोगिणः मृत्युः भवति, चन्द्रेण युक्तः भौमः मेषराशौ मेषनवांशे च स्यात्तदाऽपि रोगिणः मृत्युः भवति। पुनश्च प्रश्नलग्नेशः वृश्चिकराशेः प्रथमद्रेष्काणे स्यात्तदापि रोगिणः मृत्युः ज्ञातव्यम्। प्रश्नलग्नात् सप्तमे शुभ-पापमिश्रितौ ग्रहौ स्यातां तदा अथवा लग्नेशः पापग्रहेण युक्तः स्यात्तदा रोगी मृत्युतुल्यं कष्टं प्राप्नोति। यदि प्रश्नकाले लग्नेशो बलहीनः अष्टमेशः बलयुक्तः स्यात्तथा अष्टमेशः बलयुक्तः स्यात् चन्द्रः षष्ठे अथवाऽष्टमे भावे भवेत्तर्हि रोगिणः मृत्युः भवति, लग्नेशः उदितः स्यात् अष्टमेशः बलहीनश्च स्यात्तदा रोगी दीर्घायुः भवति। प्रश्नकाले लग्नेशाष्टमेशौ प्रथमभावे स्थितौ भूत्वा एकस्मिन्नेव द्रेष्काणे स्थितौ भवेतां तदा रुग्णस्य मृत्युः न भवेत्। परन्तु तौ एव लग्नेशाष्टमेशौ अष्टमभावस्य एकस्मिन्नेव द्रेष्काणे गतौ स्यातां तदा रोगिणः मृत्युः भवत्येव अत्र न संशयः इति। रोगिणः रोगनिर्णयविधौ उक्तम् यत् प्रश्नकाले सूर्यः अथवा भौमः अष्टमे भावे स्यात्तदा रक्तपित्तरोगः, बुधः अष्टमभावे स्यात्तदा सन्निपातरोगः राहुणा युक्तः सूर्यः यदि अष्टमभावे स्यात्तदा कुष्ठरोगः तथा राहुणा युक्तः सूर्यः षष्ठे भावे स्यात्तदा महाकुष्ठरोगः भवति। पुनः यदि राहुणा युक्तः शनिः अष्टमभावे स्यात्तदा वातरोगेण ग्रस्त्वात् हस्त-पादादीनां कम्पनं भवति। चन्द्रग्रहेण युक्तः शुक्रः अष्टमभावे स्यात्तदा सन्निपातरोगः तथा च अष्टमभावे एव स्थितः शुक्रः बलहीनः पापग्रहेण युक्तः स्यात्तदा असाध्यरोगाः भवन्ति। एवमेव लग्ने अथवा अष्टमभावे राहुः स्यात्तदा कृत्यया प्रेरितेन पिशाचादिना कष्टः भवेत् तथैव लग्नेऽथवा अष्टमे स्थितेन शनियुक्तकेतुनाऽपि भूत-प्रेतजन्यकष्टः ज्ञातव्यः। एवम्प्रकारेण पाठेऽस्मिन् रोगिणः रोगसम्बन्धिताः, आरोग्य-कष्ट-मृत्यु-इत्यादिविषयाः प्रश्नकुण्डल्या ज्ञानार्थं सम्यङ्निरूपिता इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

११.८ शब्दावली

१.	व्याधिः	=	रोगः।
२.	सुखागारं	=	चतुर्थभावं।
३.	भद्रं	=	कल्याणं।
४.	नगे	=	सप्तमभावे।
५.	कौर्प्यशे	=	वृश्चिकराशेः नवांशे।
६.	चिरञ्जीवनम्	=	दीर्घायुत्वं।
७.	महारोगः	=	असाध्यरोगः।
८.	कृत्याभवः	=	कृत्यया (योगिन्या) प्रेरितः।

११.९ सन्दर्भग्रन्थाः

१. प्रश्नभूषणम् (दैवज्ञजीवनाथ झा प्रणीतं), आचार्यः गुरूप्रसादगौडः, चौखम्बा-सुरभारतीप्रकाशनम्, वाराणसी।

११.१० सहायकग्रन्थाः

१. षट्पञ्चाशिका, डॉ. सत्येन्द्रमिश्रः, चौखम्बा संस्कृत संस्थानम्, वाराणसी।

२. भुवनदीपकः (विज्ञानभाष्यः), शुकदेव चतुर्वेदी, रंजनपब्लिकेशन, दरियागंज नई दिल्ली।

३. भुवनदीपकम्, संस्कृतभाष्यम्, ले. प्रो. वासुदेवशर्मा, राष्ट्रिय संस्कृत संस्थान, जयपुरपरिसरः जयपुरम्।

११.११ बोधप्रश्नोत्तराणि

१. सप्तमभावः।

२. चतुर्थस्थानम्।

३. दशमभावेन।

४. मृत्युः भवति।

५. शीघ्रं मृत्युः भवति।

६. रोगिणः मृत्युतुल्यं कष्टं ज्ञातव्यम्।

७. योगेऽस्मिन् रोगिणः मृत्युः भवति।

८. रक्तपित्तरोगः भवति।

९. महाकुष्ठरोगः भवति।

१०. कृत्यया (पिशाचसाधक्या) उत्पादितं कष्टं निश्चेतव्यम्।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१४.१३ अभ्यासप्रश्नाः

१. प्रश्नकुण्डल्यां रोगिणः मरणयोगत्रयम् लेख्यम्।

२. स्वकल्पितप्रश्नकुण्डल्या रोगिणः मरणाभावयोगः निद्रिष्टव्यः।

३. रोगिप्रश्ने प्रश्नकुण्डल्यां रोगनिर्णयं वर्णनीयम्।

४. प्रश्नकुण्डल्यां भूत-प्रेतजन्यकष्टयोगान् विवेचयत।

—◆—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वादशः पाठः — नष्टद्रव्यप्रश्नविचारः

पाठसंरचना

१२.१ प्रस्तावना
१२.२ उद्देश्यम्
१२.३ नष्टद्रव्यप्रश्ने विचारणीयाः भावाः
१२.४ चौरनिर्णयः
१२.४.१ अन्येषाम् आचार्याणां मतानि
बोधप्रश्नाः
१२.५ नष्टद्रव्यस्य लाभयोगाः
१२.५.१ एतद्विषयकः अपरः योगः
१२.६ नष्टद्रव्यस्य स्थाननिर्णयः
१२.६.१ एतद्विषयकम् आचार्यनीलकण्ठमतम्
१२.७ नष्टद्रव्यस्य दिङ्मार्गादीनां ज्ञानम्
बोधप्रश्नाः
मूलपाठः
१२.८ सारांशः
१२.९ शब्दावली
१२.१० सन्दर्भग्रन्थः
१२.११ सहायकग्रन्थाः
१२.१२ बोधप्रश्नोत्तराणि
१२.१३ अभ्यासप्रश्नाः

१२.१ प्रस्तावना

प्रश्नभूषणस्य 'नष्टद्रव्यप्रश्नविचारनामके' द्वादशे पाठे भवतः स्वागतम्। पूर्वस्मिन् पाठे भवान् रोगप्रश्नविचारं, रोगिणः मरणयोगान्, रोगनिर्णयविचारान्, भूतप्रेतजन्यकष्टयोगान् च सम्यक् पठितवान्। सम्प्रति 'नष्टद्रव्यस्य प्रश्नविचारे निर्णयः कथं कर्तव्यः' इति विषये विस्तरेण पठिष्यति। सामान्येन संसारेऽस्मिन् धनमाश्रित्य एव जीवनयापनं जायमानं दृश्यते। तद् धनं न केवलं रूप्यकरूपेण परिगण्यते अपितु स्त्री-पशु-सम्पद्-भूमि-सुवर्णरजतादिद्रव्याणि अपि धनरूपेण एव व्यवहियन्ते। द्रव्यशब्दस्यापि व्यापकार्थः धनमेव। महता परिश्रमेण अर्जितं तद् द्रव्यं यदि नश्यति तर्हि महद् दुःखमपि जायते। अतः नष्टस्य द्रव्यस्य पुनः प्राप्त्यर्थं केचन विशिष्टाः योगाः वर्णिताः अस्मत्पूर्वजैः ज्योतिषिकैः। अस्मिन् पाठे दैवज्ञैः जीवनाथज्ञावर्यैः रचितस्य प्रश्नभूषणग्रन्थस्य आधारेण नष्टद्रव्यस्य विचारणीयाः भावाः, चौरनिर्णयः, नष्टद्रव्यस्य स्थाननिर्णयः, दिङ्निर्णयः, नष्टद्रव्यस्य लाभयोगादयः विविधविषयाः विस्तरेण प्रतिपादिताः सन्ति। येन यः कोऽपि पाठकः नष्टद्रव्यस्य पुनः प्राप्तेः सम्भावनां स्पष्टीकर्तुं शक्ष्यति, समाजस्य च महान्तम् उपकारं कर्तुं समर्थः भविष्यति। अस्मिन् पाठे नष्टद्रव्यविषयकाणां बहुविधानां प्रश्नानां समाधानार्थं विविधविचारणीयाः अंशाः योगाश्च बहूनाम् अन्येषामपि आचार्याणां मतप्रदर्शनपूर्वकं प्रतिपाद्यन्ते।

१२.२ उद्देश्यम्

एतस्य पाठस्य अध्ययनेन भवान्-

➢ नष्टद्रव्यस्य विचारणीयान् भावान् निर्णेतुं शक्ष्यति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

- नष्टद्रव्यम् अपहृतं चेत् चौरनिर्णयं कर्तुं शक्ष्यति।
- 'नष्टद्रव्यं कस्मिन् स्थाने विद्यते' इति निर्णये समर्थो भविष्यति।
- नष्टद्रव्यस्य दिङ्निर्णये, मार्गनिर्णये च क्षमः भविष्यति।
- नष्टद्रव्यस्य प्रतिप्राप्तेः कालस्य निर्धारणे समर्थो भविष्यति।

१२.३ नष्टद्रव्यप्रश्ने विचारणीयाः भावाः

नष्टद्रव्यस्य प्रश्नविचारे यद्यपि स्पष्टतः भावानामुल्लेखं प्रश्नभूषणकारः न अकरोत् तथापि नष्टद्रव्यस्य पुनर्लाभार्थम् एकादशभावस्य वैशिष्ट्यं पौनःपुन्येन प्रतिपादयति आचार्यः। किन्तु श्रीनीलकण्ठविरचिते 'ताजिकनीलकण्ठीग्रन्थे' विस्तरेण नष्टद्रव्यप्रश्ने विचारणीयानां भावानां प्रतिपादनं कृतमस्ति। तद्यथा –

''नद्युत्तारेऽध्ववैषम्ये दुर्गे शात्रवसङ्कटे।
नष्टे दुष्टे रणे व्याधौ छिद्रे छिद्रं निरीक्षयेत्॥''

अष्टमस्थानात् नष्टवस्तुविषयकप्रश्नस्य विचारः करणीयः। अन्यच्च –

''नष्टवीतवित्तलब्धेः प्रश्ने चौरोऽस्तभं ततो लाभः।
हिबुकं द्रव्यस्थानं लग्नं चन्द्रश्च धननाथः॥''

अत्र नष्टधनस्य पुनर्लाभविषये सप्तमभावात् चौरः, चतुर्थभावात् नष्टद्रव्यस्य प्राप्तेः स्थानम्, लग्नात् द्रव्यं, चन्द्रात् नष्टधनस्य स्वामी च मन्तव्याः। ततः चिन्तनं कृत्वा नष्टद्रव्यविषये स्पष्टतया निर्णयः कर्तुं शक्यते। अतः पूर्वोक्ताः भावाः नष्टद्रव्यप्रश्ने अवश्यं विचारणीयाः।

१२.४ चौरनिर्णयः

नष्टद्रव्यं बहुविधं भवति। यथा– अपहृतम्, लुप्तम्, स्वयं क्वचित् संस्थाप्य विस्मृतम् इत्यादिकम्। अपहृतस्य धनस्य चौरज्ञानाय विविधाः योगाः प्रश्नभूषणग्रन्थे प्रोक्ताः सन्ति। तान् योगान् अभिज्ञातुं राशीनां स्वरूपस्य, नवांशादीनां व्यवस्थायाः वर्गोत्तमनवांशादीनां च स्फुटं ज्ञानं परमावश्यकम्, यत्तु पूर्वतनपाठेषु स्पष्टतया प्रतिपादितमस्ति। नष्टद्रव्यस्य चौरनिर्णयविषये आचार्यः जीवनाथज्ञावर्यः एवं प्रतिपादयति –

मूलपाठः – **'स्थिरे लग्ने तदंशे वा निजवर्गोत्तमेऽपि वा।**
निजेन चोरितं वित्तं यद्वा तत्रैव संस्थितम्॥'

पदच्छेदः – स्थिरे, लग्ने, तद्, अंशे, वा, निज-वर्गोत्तमे, अपि, वा, निजेन, चोरितं, वित्तम्, यद्, वा, तत्र, एव, संस्थितम्।

अन्वयः - स्थिरे लग्ने तदंशे वा निजवर्गोत्तमे अपि वा निजेन चोरितं वित्तं (वाच्यम्)। यद्वा तत्रैव संस्थितम् (इति वाच्यम्)।

प्रतिपदार्थः – स्थिरे = स्थिरसंज्ञकेषु वृष-सिंह-वृश्चिक-कुम्भ-राशिषु, लग्ने = प्रश्नलग्ने (सति), तदंशे = स्थिरराशीनां नवांशे (सति), वा = अथवा, निजवर्गोत्तमे = स्वकीये वर्गोत्तमनवांशे गते (सति), निजेन = स्वकीयेन सम्बन्धिना बन्धुना वा, चोरितं = अपहृतम्, वित्तं = धनं कथनीयम्। यद् वा तत्रैव = पूर्वनिश्चिते स्थले, एव = निश्चयेन, संस्थितम् = सम्यक् स्थितं सुरक्षितं वा वक्तव्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावार्थः – दैवज्ञस्य पुरतः यदा कश्चिदागत्य नष्टवस्तु-द्रव्य-धनादिविषयकं प्रश्नं पृच्छति तदा दैवज्ञः प्रश्नकुण्डलीं निर्माय फलादेशार्थं सिद्धो भूत्वा अधोलिखितान् अंशान् प्रमुखरूपेण स्वबुद्धौ संस्थापयेत्। तद्यथा –

१. प्रश्नकुण्डल्यां प्रश्नलग्नं किम् ?

२. प्रश्नलग्नं कस्य राशेः नवांशस्य वर्तते ?

३. प्रश्नकुण्डल्यां प्रमुखग्रहाः केषु भावेषु विद्यन्ते ? इति।

यदि धनं चोरितं भवति तर्हि चौरः दूरदेशीयः उत स्वगृहे विद्यमानः कश्चन जनः, इत्यस्य अभिज्ञानार्थं, तद् द्रव्यं सम्प्रति कुत्र विद्यते इत्यस्य च अवबोधार्थं आचार्यजीवनाथझावर्यः प्रश्नभूषणे त्रीन् योगान् उक्त्वा तत्फलं प्रतिपादयति। तद्यथा –

(क) प्रश्नलग्नं यदि वृष-सिंह-वृश्चिक-कुम्भराशिषु भवति।

(ख) प्रश्नलग्नं स्थिरराशेः नवांशे भवति।

(ग) प्रश्नलग्नं स्वीयवर्गोत्तमनवांशस्य भवति।

एतेषु योगेषु द्रव्यं स्वबन्धुना, समीपस्थेन केनचिद् वा अपहृतं भवति, तद् द्रव्यं च तस्मिन् एव स्थले सुरक्षितं भवति इति निर्णयः कर्तव्यः।

ध्यातव्यम् –

– अत्र स्थिरराशयः वृष-सिंह-वृश्चिक-कुम्भाः सन्ति।

– नवांशगणना मेष-मकर-तुला-कर्कादिक्रमेण करणीया।

– वर्गोत्तमांशास्तु इमे प्रोक्ताः आचार्यवराहेण –

''वर्गोत्तमाश्चरगृहादिषु पूर्वमध्य-
पर्यन्तगाः शुभफला नवभागसंज्ञाः।''

एवं प्रकारेण स्थिरराशिषु पञ्चमः नवांशः वर्गोत्तमनवांशः कथ्यते।

१२.४.१ अन्येषाम् आचार्याणां मतानि

संक्षेपरूपेण प्रश्नभूषणग्रन्थे चौरनिर्णयविषये आचार्यजीवनाथझावर्येण स्वमतं प्रस्तुतम्। अस्मिन्नेव विषये प्रश्नवैष्णव-प्रश्नमार्ग-ताजिकनीलकण्ठ्यादिषु ग्रन्थेषु अपि विस्तरेण वर्णनम् उपलभ्यते। तानि मतानि अत्रापि वर्ण्यन्ते। श्रीनीलकण्ठाचार्यः चौरनिर्णयं विस्तरेण वर्णयति। तद्यथा –

''चौरज्ञानप्रश्ने लग्नरविशशिदृशा स्वगृहचौरसः।
अनयोरेकदृशा गृहसमीपवर्ती वसत्येषः॥''

अर्थात् लग्ने यदि रविचन्द्रयोः दृष्टिः भवति तदा गृहजनाः एव चौर्यं कुर्वन्ति। अनयोः एकस्य दृष्टिः यदि लग्ने भवति तदा गृहसमीपस्थः कश्चन जनः चौरः इति अवगन्तव्यम्। अन्यच्च उच्यते –

''लग्नदशमास्तभावाः क्रमेण वीक्ष्याः स्वतुङ्गभवनादौ।
यः खेटः स्याद् बलवान् स ज्ञेयस्तस्करस्य बली॥

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं योगं तु विना द्यूनेशस्यैव बलमभिग्राह्यम्।
इत्थं चौरज्ञाने चौरः सूर्ये गृहेश्वरस्य पिता॥

चन्द्रे माता शुक्रे भार्या मन्दे सुतो भवेन्नीचे।
जीवे गृहप्रधाने भौमे पुत्रोऽथ वा भ्राता॥''

एतदनुसारं लग्न-सप्तम-दशमभावेषु यस्मिन् बलिष्ठः ग्रहः भवति तदनुसारं चौरस्य बलप्रदायकः सहायकः ज्ञेयः। यदि लग्न-सप्तम-दशमेषु भावेषु सूर्यः बली भूत्वा स्थितः भवति तर्हि पृच्छकस्य पिता एव चौरस्य सहायकः भवति। चन्द्रेण माता, शुक्रेण स्त्री, शनिना पुत्रः, गुरुणा गृहस्वामी, कुजेन पुत्रः भ्राता वा, बुधेन मित्राणि च चौरसहायकरूपेण अवगन्तव्यानि। चौरः कः इति यदि स्पष्टतया ज्ञायते तर्हि विनष्टद्रव्यं शीघ्रमेव प्राप्तुं शक्यते।

बोधप्रश्नाः

१. 'छिद्रम्' कस्य भावस्य अपरं नाम ?

२. नष्टद्रव्यप्रश्नस्य विचारः मुख्यतः केन भावेन करणीयः ?

३. स्थिरराशयः के ?

४. स्थिरराशिषु कतमः नवांशः वर्गोत्तमसंज्ञकः ?

५. 'अंशः' इति शब्देन कः अर्थः ग्राह्यः ?

६. लग्ने यदि रविचन्द्रयोः दृष्टिः भवति तर्हि चौरः कः ?

७. कस्य बलिष्ठग्रहस्य लग्ने स्थितिवशात् स्त्री चौरसहायकरूपेण निर्णीयते ?

१२.५ नष्टद्रव्यस्य लाभयोगाः

नष्टवस्तुनः चौरः कः भवितुमर्हति इति निर्णयः पूर्वोक्तविवरणेन भवेद् एव। सम्प्रति नष्टं द्रव्यं पुनः प्राप्यते न वा? नष्टद्रव्यस्य लाभः भवति न वा इति निर्णयार्थं नष्टधनलाभयोगान् प्रत्यपादयत् प्रश्नभूषणकारः आचार्यः जीवनाथझावर्यः। तद्यथा –

मूलपाठः –

पूर्णेन्दुरङ्गगो युक्तो दृष्टो वा शुभखेचरैः।
शीर्षोदये वा नष्टाप्तिं कुरुते लाभगोऽपि सत्॥

पदच्छेदः – पूर्णः, इन्दुः, अङ्गगः, युक्तः, दृष्टः, वा, शुभ-खेचरैः, शीर्षोदये, वा, नष्ट-आप्तिं, कुरुते, लाभगः, अपि, सत्।

अन्वयः – अङ्गगः पूर्णेन्दुः शुभखेचरैः युक्तः दृष्टः वा नष्टाप्तिं कुरुते। (लग्ने) शीर्षोदये (सति), सत् लाभगः अपि (नष्टाप्तिं कुरुते)।

प्रतिपदार्थः – अङ्गगः = अङ्गं-लग्नं, तं गतः अङ्गगः, लग्नस्थितः इत्यर्थः, पूर्णेन्दुः = पूर्णः-बलयुक्तः चन्द्रः, शुभखेचरैः = शुभैः-सौम्यैः, खेचरैः = खे चरन्ति इति खेचराः ग्रहाः इत्यर्थः, तैः सौम्यग्रहैः, युक्तः = संयुक्तः, दृष्टः = अवलोकितः, वा, नष्टाप्तिं = नष्टस्य द्रव्यस्य, आप्तिं = पुनर्लाभं कुरुते। प्रश्नलग्ने शीर्षोदये = शीर्षोदयसंज्ञकराशिषु (मिथुन-सिंह-कन्या-तुला- वृश्चिक-कुम्भ-मीनः सति नष्टद्रव्यस्य पुनर्लाभः भवति। सत् = शुभग्रहः, लाभगः = लाभं गतः एकादशभावे स्थितः इत्यर्थः, अपि नष्टद्रव्यस्य पुनर्लाभं करोति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावार्थः – नष्टद्रव्यस्य पुनर्लाभार्थं विशिष्टाः केचन योगाः अत्र प्रतिपादिताः सन्ति। प्रथमः योगः चन्द्रग्रहवशात्, द्वितीयः शीर्षोदयराशिवशात् तृतीयश्च योगः भाववशात् प्रोक्तः।

(१) प्रथमप्रकारकयोगे चन्द्रः मुख्यः। चन्द्रः यदि बलिष्ठः सन् शुभग्रहैः दृष्टः युतश्च प्रश्नलग्ने स्थितः भवति तर्हि नष्टद्रव्यस्य पुनर्लाभः अवश्यं जायते।

(२) प्रश्नलग्नं यदि शीर्षोदयराशीनां भवति तर्हि अपि नष्टधनस्य पुनर्लाभः वक्तव्यः। शीर्षोदयराशयः मिथुन-सिंह-कन्या-तुला-वृश्चिक-कुम्भ-मीनाः सन्ति। अतः एतेषु कश्चित् राशिः लग्ने भवति चेत् नष्टद्रव्यं पुनः प्राप्यते।

(३) अपरः योगः भाववशात् प्रोच्यते। एकादशभावः आयभावः, अयं लाभभावत्वेन अपि सुप्रसिद्धः। अतः अस्मिन् एकादशे भावे यदि गुरु-बुधादयः शुभग्रहाः भवन्ति चेत् नष्टद्रव्यस्य पुनः प्राप्तिः अवश्यं भवति।

स्पष्टतार्थं नष्टद्रव्यस्य पुनर्लाभयोगानां प्रदर्शिकाः कुण्डल्यः अत्र दर्शयन्ते –

प्रथमयोगः



द्वितीययोगः



तृतीययोगः



१२.५.१ एतद्विषयकः अपरः योगः

नष्टं द्रव्यं कदाचित् अतिशीघ्रमेव प्राप्यते, कदाचित् तु बहोकालादनन्तरम्। तदर्थं केचन योगाः आचार्यैः स्पष्टीकृताः येषु योगेषु नष्टधनस्य पुनर्लाभः सत्वरम् एव भवति। तद्यथा –

मूलपाठः –

''पूर्णबिम्बः शशी लग्नगो वीक्षितो देवपूज्येन शुक्रेण वा पृच्छतः।
नष्टवित्तस्य लाभञ्च लाभालये सौम्यखेटो बली सत्वरं यच्छति॥''

पदच्छेदः – पूर्णः, बिम्बः, शशी, लग्नगः, वीक्षितः, देव-पूज्येन, शुक्रेण, वा पृच्छतः, नष्ट-वित्तस्य लाभं, च, लाभालये, सौम्य-खेटः, बली सत्वरं, यच्छति।

अन्वयः – लग्नगः पूर्णबिम्बः शशी, देवपूज्येन शुक्रेण वा वीक्षितः पृच्छतः नष्टवित्तस्य लाभं (कुरुते)। लाभालये बली सौम्यखेटः सत्वरं (नष्टवित्तस्य लाभं) यच्छति।

प्रतिपदार्थः – लग्नगः = लग्नं गतः लग्नगः, लग्ने स्थितः इत्यर्थः, पूर्णबिम्बः = पूर्णं बिम्बं आकारो वा, पूर्णबिम्बाः ग्रहाः बलशालिनः कथ्यन्ते। शशी = चन्द्रः, देवपूज्येन = गुरुणा, देवैः पूज्यः देवपूज्यः भवति स च गुरुः प्रसिद्धः, शुक्रेण = शुक्रग्रहेण वा, वीक्षितः = अवलोकितः, पृच्छतः = प्रश्नकर्तुः, नष्टवित्तस्य = नष्टस्य धनस्य, लाभं करोति।

लाभालये = लाभस्थाने एकादशभावे, बली = बलपूर्णः, सौम्यखेटः = शुभग्रहः, (खे-आकाशे अटति इति खेटः ग्रहः इत्यर्थः), सत्वरं = अतिशीघ्रं नष्टवित्तस्य लाभं यच्छति = प्रददाति इति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावार्थः – नष्टद्रव्यस्य पुनर्लाभविषये केचन योगाः पूर्वं वर्णिताः सम्प्रति नष्टद्रव्यस्य अतिशीघ्रं पुनर्लाभविषये केचन योगाः प्रतिपाद्यन्ते। सत्वरं पुनर्लाभविषये द्वौ योगौ आचार्यजीवनाथझावर्यः प्रतिपादितवान्। तद्यथा –

(१) प्रथमतः चन्द्रग्रहस्य स्थितिवशादेव योगः सिद्ध्यति, प्रश्नलग्ने स्थितः चन्द्रः यदि पूर्णिमाकालिकः बलयुक्तः भवति तदुपरि गुरोः शुक्रस्य वा दृष्टिः भवति तदा अयं प्रथमः योगः सिद्ध्यति। अस्मिन् योगे अतिशीघ्रमेव विनष्टधनस्य प्रतिप्राप्तिः सम्भवति।

(२) द्वितीयः योगस्तु एकादशभाववशात् सिद्ध्यति। बुध-गुरु-शुक्रेषु अन्यतमः कश्चन बलयुक्तः। शुभग्रहः यदि एकादशस्थाने तिष्ठति तर्हि द्वितीयः योगः। अस्मिन्नपि योगे प्रश्नकर्ता नष्टधनं शीघ्रमेव प्राप्नोति।

अनयोः योगयोः स्फुटतया अवबोधार्थं कुण्डलीप्रदर्शनम् अत्र क्रियते।

नष्टद्रव्यस्य शीघ्रलाभस्य प्रथमः योगः



नष्टद्रव्यस्य शीघ्रलाभस्य द्वितीयः योगः



१२.६ नष्टद्रव्यस्य स्थाननिर्णयः

नष्टद्रव्यस्य प्रश्नविचारे द्रव्यं केन प्रकारेण नश्यति इति स्पष्टतया आदौ निरूपितम्। ततश्च द्रव्यनाशस्य प्रमुखकारणीभूतस्य चौरस्य अभिज्ञानं निर्णयश्च कथं कर्तव्यः इति मतान्तरज्ञानपूर्वकं स्पष्टम् जातम्। तदनन्तरं नष्टद्रव्यमिदं पुनः लभ्यते न वा इति निर्णयोऽपि जातः। सम्प्रति नष्टद्रव्यस्य पुनर्लाभे निश्चिते तद् द्रव्यं कस्मिन् स्थाने लभ्यते इति स्थाननिर्णयार्थं प्रमुखांशान् प्रश्नभूषणकारः प्रतिपादयति। यथा –

मूलपाठः – पूर्वे मध्येऽन्तिमेऽङ्गस्य दृक्काणे क्रमतो बुधः।
द्वारान्तिके तथा मध्ये गृहान्ते तद्धनं वदेत्॥

पदच्छेदः – पूर्वे, मध्ये, अन्तिमे, अङ्गस्य, दृक्काणे, क्रमतः, बुधः, द्वार-अन्तिके, तथा, मध्ये, गृह-अन्ते, तद्, धनं, वदेत्।

अन्वयः – अङ्गस्य पूर्वे मध्ये अन्तिमे दृक्काणे (स्थिते सति) तद्धनं क्रमेण द्वारान्तिके मध्ये तथा गृहान्ते वदेत्।

प्रतिपदार्थः – अङ्गस्य = प्रश्नलग्नस्य, पूर्वे = प्रथमे, मध्ये = द्वितीये, अन्तिमे = तृतीये, दृक्काणे = षड्वर्गेषु प्रसिद्धे द्रेष्काणे, स्थिते सति, तद्धनं = नष्टम् अपहृतं वा धनं,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रमेण = क्रमशः, प्रथम-द्वितीय-तृतीयक्रमेण इत्यर्थः, द्वारान्तिके = द्वारसमीपे, मध्ये = गृहस्य अन्तः मध्यभागे वा, तथा, गृहान्ते = गृहस्य अन्तिमभागे, वदेत् = कथयेत् प्रतिपादयेत् वा इति।

भावार्थः – चोरितस्य अथवा प्रकारान्तरेण नष्टस्य द्रव्यस्य स्थाननिर्णयार्थं प्रश्नलग्नस्य द्रेष्काणगणनायाः विशेषमहत्त्वम् अस्ति। नष्टद्रव्यं गृहे एव विद्यते उत बहिः नीतमस्ति इत्यस्य अभिज्ञानं द्रेष्काणवशात् एव भवति। द्रेष्काणगणनां स्पष्टरूपेण प्रतिपादयति आचार्यः वराहमिहिरः। तद्यथा –

''द्रेक्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्'' इति।

एवं द्रेष्काणानां गणना स्वस्थानात्, पञ्चमात्, नवमस्थानात् च करणीया इति।

एकस्मिन् राशौ १०-१० अंशानां त्रयः भागाः क्रियन्ते। प्रथमभागः १ तः १० अंशपर्यन्तम्, द्वितीयभागः ११ तः २० अंशपर्यन्तं, तृतीयभागश्च २१ तः ३० अंशपर्यन्तं भवति। प्रथमः द्रेष्काणेशः तस्य एव राशेः स्वामी भवति, द्वितीयस्तु तत्स्थानात् पञ्चमराशेः भवति, तृतीयः द्रेष्काणेशः स्वस्थानात् नवमराशेः अधिपतिः भवति।

उदाहरणम् –

मेषराशौ प्रथमः द्रेष्काणेशः मेषस्यैव स्वामी कुजः भवति द्वितीयः द्रेष्काणेशः मेषात् पञ्चमस्य सिंहराशेः स्वामी सूर्यः भवति। तृतीयः द्रेष्काणेशः मेषात् नवमस्य धनुराशेः अधिपतिः गुरुः भवति। अनेन एव प्रकारेण अन्येषु सर्वेषु अपि राशिषु द्रेष्काणेशाः ज्ञेयाः।

नष्टद्रव्यप्रकरणे तु प्रश्नलग्नं यदि प्रथमद्रेष्काणे (1 तः 10 अंशपर्यन्तं) भवति चेत् चोरितद्रव्यं द्वारसमीपे एव क्वचिद् भवति। प्रश्नलग्नं द्वितीयद्रेष्काणे भवति चेत् चोरितद्रव्यं गृहस्य मध्यभागे एव क्वचित् भवति। प्रश्नलग्नं यदि तृतीयद्रेष्काणे भवति तर्हि चोरितद्रव्यं गृहस्य अन्तिमे भागे क्वचित् कोणे भवति इति निर्णयः वक्तव्यः।

१२.६.१ एतद्विषयकं आचार्यनीलकण्ठस्य मतम्

नष्टद्रव्यं गृहस्य अन्तः, बहिः, द्वारसमीपे च कुत्र अस्ति इति निर्णयार्थं प्रश्नभूषणग्रन्थस्य मतमस्माभिः परिशीलितम्। सूक्ष्मरूपेण नष्टद्रव्यस्य स्थाननिर्णये आचार्यः नीलकण्ठः स्वीये 'ताजिकनीलकण्ठी' ग्रन्थे विस्तारपूर्वकं स्वमतम् उपस्थापयति। तद्यथा –

''नष्टस्थानप्रश्ने तुर्ये भूम्यग्निवायुजलमध्यात्।
यो भवति राशिरस्मात् स्थानं ज्ञेयं गतधनस्य॥
अथ तूर्यगृहे तुर्येश्वरोऽथ यः स्याद् ग्रहस्ततो ज्ञेयम्।
मन्दे मलिनस्थाने चन्द्रेऽम्बुनि गीष्पतौ सुरारामे॥
भौमे वह्निसमीपे रवौ गृहाधीश्वरासनस्थाने।
तल्पे शुक्रे सौम्ये पुस्तकवित्तान्नयानपार्श्वे च॥

भावार्थः – आचार्यनीलकण्ठमतेन नष्टवस्तुनः स्थाननिर्णये चतुर्थभावस्य, चतुर्थभावाधीशस्य, चतुर्थस्थानस्थ-ग्रहस्य च महन्महत्त्वं वर्तते। तद्यथा -

(१) चतुर्थस्थाने पृथ्वीतत्त्वराशेः स्थित्या नष्टद्रव्यं भूमौ अस्ति इति ज्ञेयम्। पृथ्वीतत्त्वराशयः वृष-कन्या-मकराः सन्ति।

(२) अग्नितत्त्वराशिः चतुर्थस्थाने भवति चेत् नष्टद्रव्यं पाकशालासदृशे अग्नियुक्ते स्थाने अस्ति इति अवगन्तव्यम्। अग्नितत्त्वयुक्ताः मेष-सिंह-धनुराशयः सन्ति।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३) चतुर्थस्थाने जलतत्त्वराशेः स्थित्या नष्टद्रव्यस्य जले, जलस्थानसमीपे वा स्थितिः ज्ञेया। जलतत्त्वराशयः कर्क-वृश्चिक-मीनाः सन्ति।

(४) वायुतत्त्वराशिः चतुर्थस्थाने अस्ति चेत् क्वचित् ऊर्ध्वस्थाने दोलायमानं नष्टद्रव्यमस्ति इति ज्ञेयम्। वायुतत्त्वराशयः मिथुन-तुला-कुम्भाः सन्ति।

(५) पूर्वं यथा चतुर्थस्थाने विद्यमानराशिवशात् स्थाननिर्णयः जातः तथैव चतुर्थस्थाने विद्यमानग्रहवशात् अथवा चतुर्थभावस्य स्वामिग्रहवशात् सूक्ष्मतया स्थानानि ज्ञेयानि।

(६) चतुर्थे भावे शनिग्रहः अस्ति चेत् नष्टद्रव्यं मलिनस्थाने (अवकर-कण्डोलादिषु) ज्ञेयम्।

(७) चतुर्थभावे चन्द्रस्य स्थितिवशात् नष्टद्रव्यं जलस्थाने (नलकूप-जलशोधक-कूप- जलपात्रादीनां समीपे) ज्ञेयम्।

(८) चतुर्थभावे गुरोः स्थितिवशात् देवालये, कुजस्य स्थितिवशात् अग्नियुक्तस्थाने, रवेः स्थितिवशात् आसनस्य समीपे, शुक्रस्य स्थितिवशात् शय्यायाः समीपे, बुधस्य स्थितिवशात् पुस्तकालये, पशुशालायां, वित्तकोषादीनां च समीपे नष्टद्रव्यम् अस्ति इति वाच्यम्।

१२.७ नष्टद्रव्यस्य दिङ्मार्गादीनां ज्ञानम्

नष्टद्रव्यस्य पुनः प्राप्त्यर्थम् आधुनिककाले आरक्षकादिभिः महान् परिश्रमः क्रियते। आरक्षकाः सर्वान् साक्ष्यान् तथ्यानि च सम्यक् विश्लिष्य नष्टद्रव्यस्य चौरनिर्णये कथञ्चिद् सक्षमाः भवन्ति। चौरग्रहणानन्तरम् एव चोरितद्रव्यस्य स्थाननिर्णये, पुनर्लाभनिर्णये च क्षमाः भवन्ति। प्रश्नकर्मणि नष्टद्रव्यस्य पुनः प्राप्तिनिर्णये दैवज्ञः पूर्वाचार्याणां मतानुसारेण स्वीयानुभवेन च न केवलं चौरनिर्णयं करोति अपितु नष्टद्रव्यस्य स्थान-दिङ्मार्ग-पुनर्लाभादिविषयान् अपि स्पष्टीकरोति।

प्रश्नभूषणग्रन्थे प्रतिपादितस्य नष्टद्रव्यस्य स्थितेः, दिशः, मार्गाणां च विषये उत्कृष्टं विचारम् उपस्थापयति जीवनाथझावर्यः। तद्यथा –

मूलपाठः – **''वक्तव्या नष्टवित्ताशा केन्द्रोपगतखेचरैः।**
अभावे प्रश्नलग्नर्क्षाद्विच्युतांशैस्तु योजनम्॥''

पदच्छेदः – वक्तव्या, नष्ट, वित्त-आशा, केन्द्र-उपगत-खेचरैः, अभावे, प्रश्न-लग्न-ऋक्षात्, विच्युत-अंशैः, तु, योजनम्।

अन्वयः – केन्द्रोपगतखेचरैः नष्टवित्ताशा वक्तव्या। (केन्द्रोपगतखेचराणाम्) अभावे प्रश्नलग्नर्क्षात् (नष्टवित्ताशा वक्तव्या)। विच्युतांशैः तु (नष्टवित्तस्य) योजनं वक्तव्यम्।

प्रतिपदार्थः – केन्द्रोपगतखेचरैः = केन्द्रस्थानेषु स्थितैः ग्रहैः, नष्टवित्ताशा = नष्टधनस्य दिशा, वक्तव्या = कथनीया। अभावे = केन्द्रस्थानेषु ग्रहाणाम् अभावे, प्रश्नलग्नर्क्षात् = प्रश्नलग्नस्य राशितः, नष्टद्रव्यस्य दिशा वक्तव्या। विच्युतांशैः = प्रश्नलग्नस्य गतनवांशैः, तु योजनं = दूरीमापनस्य 'योजनम्' इत्याख्यं परिमाणम्, अर्थात् नष्टद्रव्यं कति योजनानि दूरे अस्ति इति वक्तव्यम्।

भावार्थः – नष्टद्रव्यविषये द्वयोः प्रकरणयोः विवेचनम् अत्र एकस्मिन्नेव श्लोके प्रतिपादितमस्ति। प्रथमं तु नष्टद्रव्यं कस्मिन् दिशि विद्यमानमस्ति, द्वितीयं तावत् नष्टद्रव्यं कियत्परिमितं दूरे अस्ति इति। द्वयोः अपि प्रकरणयोः क्रमशः विवेचनमत्र प्रस्तूयते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१) नष्टद्रव्यस्य दिशाया निर्णयः –

नष्टधनस्य दिशायाः निर्णये आचार्यः जीवनाथझावर्यः केन्द्रभावानां स्थितिं विशिष्टां स्वीकरोति। केन्द्रभावाः तु प्रथम-चतुर्थ-सप्तम-दशमाः भवन्ति। एतेषु केन्द्रस्थानेषु स्थितग्रहेषु यः बलवान् भवति, तस्य ग्रहस्य अनुसारं नष्टधनस्य दिशायाः निर्णयः कर्तव्यः। ग्रहाणां दिशायाः निर्णये आचार्याणां वराहमिहिराणां वचनमेवं विद्यते –

''प्रागाद्या रविशुक्रलोहिततमः सौरेन्दुवित्सूरयः॥'' इति।

अत्र पूर्वस्यां दिशि रविः अधिपतिः भवति, पूर्व-दक्षिणस्याम् अर्थात् आग्नेयदिशि शुक्रः अधिपतिः, दक्षिणदिशि कुजग्रहः, नैर्ऋत्ये राहुः, पश्चिमदिशि शनिः, वायव्यां चन्द्रः, उत्तरदिशि बुधः, ऐशान्यां गुरुः अधिपतिरूपेण राजते।

नष्टद्रव्यस्य दिशायाः निर्णये एतासां दिशानाम् अधिपतयः एव कारकाः। अतः केन्द्रस्थानेषु गतेषु ग्रहेषु यः ग्रहः बलवान्, तस्य ग्रहस्य या दिशा, तस्यां दिशि एव नष्टधनम् अस्ति इति निर्णयः कर्तव्यः। केन्द्रस्थानेषु ग्रहाणाम् अभावे तु प्रश्नलग्ने यः राशिः आरूढः भवति तद्राशिवशात् नष्टधनस्य दिशायाः निर्णयः कर्तव्यः।

राशीनां दिशाः एवं प्रकारेण प्रतिपादिताः वराह मिहिराचार्येण –

''प्रागाधीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः'' इति।

अत्र मेष-सिंह-धनुराशयः पूर्वदिशि, वृष-कन्या-मकरराशयः दक्षिणदिशि, मिथुन-तुला-कुम्भराशयः पश्चिमदिशि, कर्कटवृश्चिक-मीनराशयः च उत्तरदिशि स्वामीरूपेण तिष्ठन्ति। अतः नष्टधनस्य प्रश्नविचारे केन्द्रभावेषु ग्रहाणाम् अभावः भवति चेत् प्रश्नलग्नराशिवशात् नष्टधनस्य दिशाः कथनीयाः, यथा –

(१) लग्ने यदि मेष-सिंह-धनुराशयः सन्ति तर्हि नष्टधनं पूर्वदिशि अस्ति इति निर्णयः कर्तव्यः।

(२) लग्ने यदि वृष-कन्या-मकरराशयः सन्ति तर्हि दक्षिणदिशि।

(३) लग्ने यदि मिथुन-तुला-कुम्भराशयः सन्ति तर्हि पश्चिमदिशि, नष्टद्रव्यम् अस्ति इति वक्तव्यम्।

(४) यदि लग्ने कर्कट-वृश्चिक-मीनराशयः भवन्ति तर्हि नष्टद्रव्यं उत्तरदिशि अस्ति इति वक्तव्यम्। अयमेव नष्टद्रव्यस्य दिशाविषयकः विचारः प्रश्नभूषणकारैः सूत्ररूपेण प्रस्तुतः।

(२) नष्टद्रव्यस्य मार्गनिर्णयः –

नष्टद्रव्यं कियत्दूरम् अस्ति इति निर्णयार्थं सूक्ष्ममेकं सूत्रं प्रस्तुतम् आचार्यैः। तद्यथा – ''विच्युतांशैस्तु योजनम्'' इति। विच्युताः = गताः, अंशाः = नवांशाः इत्यर्थः। प्रश्नलग्नस्य यावन्तः गतनवांशाः तावन्ति योजनानि दूरे एव नष्टधनं भवति इति अवगन्तव्यम्।

उदाहरणम् – प्रश्नलग्नस्फुटम् = ३-०२-१५'-३८''

अत्र प्रश्नलग्नं कर्कराशेः प्रथमनवांशे वर्तते। अतः नष्टधनम् एकयोजनदूरे अस्ति इति निर्णयः वक्तव्यः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ध्यातव्यम् - नवांशानां पूर्त्यनन्तरम् अंशादिवशात् योजन-क्रोश-अर्धक्रोशादयः अपि अनुपातेन निर्णेतव्याः।

बोधप्रश्नाः

८. शुभग्रहैः दृष्टस्य पूर्णचन्द्रस्य प्रश्नलग्ने स्थितिवशात् किं फलं भवति?

९. शीर्षोदयराशयः के?

१०. शुभग्रहाणाम् एकादशभावे स्थितिवशात् नष्टवस्तुनः पुनर्लाभः भवति न वा?

११. पूर्णबलयुक्तचन्द्रे केषां ग्रहाणां दृष्ट्या नष्टधनस्य पुनर्लाभः सम्भवति?

१२. नष्टधनस्य शीघ्रप्राप्तये कस्मिन् भावे शुभग्रहस्य स्थितिः अपेक्षिता?

१३. प्रश्नलग्ने द्वितीयद्रेष्काणे स्थिते सति नष्टद्रव्यं कस्मिन् स्थाने लभ्यते?

१४. चतुर्थे कस्य ग्रहस्य स्थित्या नष्टद्रव्यं मलिनस्थाने लभ्यते?

१५. बलिष्ठसूर्यस्य लग्ने स्थितिवशात् चोरितधनस्य का दिशा वक्तव्या?

१६. वृष-कन्या-मकरराशयः कस्याः दिशायाः स्वामिनः?

१७. नष्टधनस्य योजनपरिमिते दूरे स्थिति केन निर्णेतव्या?

मूलपाठः

स्थिरे लग्ने तदंशे वा निजवर्गोत्तमेऽपि वा।
निजेन चोरितं वित्तं यद्वा तत्रैव संस्थितम्॥

पूर्वे मध्येऽन्तिमेऽङ्गस्य दृक्काणे क्रमतो बुधः।
द्वारान्तिके तथा मध्ये गृहान्ते तद्धनं वदेत्॥

पूर्णेन्दुरङ्गगो युक्तो दृष्टो वा शुभखेचरैः।
शीर्षोदये वा नष्टाप्तिं कुरुते लाभगोऽपि सत्॥

पूर्णबिम्बः शशी लग्नगो वीक्षितो देवपूज्येन शुक्रेण वा पृच्छतः।
नष्टवित्तस्य लाभञ्च लाभालये सौम्यखेटो बली सत्वरं यच्छति॥

वक्तव्या नष्टवित्ताशा केन्द्रोपगतखेचरैः।
अभावे प्रश्नलग्नर्क्षाद्विच्युतांशैस्तु योजनम्॥

१२.८ सारांशः

प्रियपाठकाः! महता परिश्रमेण अर्जितस्य धनस्य अथवा क्रीतस्य वस्तुनः नाशः लोपः वा मनसि महान्तं क्लेशम् अवश्यं जनयति। तादृशस्य मनसः क्लेशनिवारणार्थं प्रश्नकर्मद्वारा नष्टद्रव्यस्य पुनर्लाभार्थं प्रयत्नः विधीयते ज्योतिश्शास्त्रेण। तत्र बहवो हि प्राचीनाः आचार्याः प्रश्नकर्मविषये स्वमतानि विविधग्रन्थेषु प्रतिपादितवन्तः। तेषु प्रश्नशास्त्रे महान्तं परिश्रमं कृत्वा प्रश्नभूषणनामकं ग्रन्थम् अरचयत् दैवज्ञः जीवनाथझावर्यः। ग्रन्थेऽस्मिन् नष्टद्रव्यस्य प्रश्नमाधारीकृत्य तैः सूक्ष्मविचाराः प्रस्तुताः। ते विचाराः क्रमशः अस्मिन् पाठे निरूपिताः सन्ति। प्रथमतः ग्रन्थान्तरेषु प्रतिपादिताः नष्टद्रव्यप्रश्ने विचारणीयाः भावाः प्रस्तुताः। विशेषतः अष्टमभावः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ततश्च लग्न-चतुर्थ-सप्तम-एकादशभावाः नष्टद्रव्यस्य प्रश्नविषये विचारणीयाः भवन्ति। ततश्च द्रव्यं यदि चोरितं चेत् चौरः कः भवितुमर्हति इति प्रतिपादितम्। प्रश्नलग्नं यदि वृष-सिंह-वृश्चिक-कुम्भराशिषु, स्थिरराशेः नवांशे अथवा स्ववर्गोत्तमनवांशे भवति तर्हि द्रव्यं स्वबन्धुना चोरितं भवति सुरक्षितं च भवति इति निर्णयः कर्तव्यः। एतद्विषये अन्येषाम् आचार्याणां मतानि अपि प्रस्तुतानि। ततः नष्टद्रव्यस्य पुनर्लाभविषये त्रयः योगाः विचारिताः तद्यथा– शुभग्रहैः दृष्टः युतः वा चन्द्रः यदि पूर्णबली भवति तदा चोरितवस्तुनः पुनर्लाभः भवति। प्रश्नलग्नं मिथुन-सिंह-कन्या-तुला-वृश्चिक-कुम्भ-मीनराशीनां भवति तदाऽपि नष्टद्रव्यस्य पुनर्लाभः भवति। एकादशभावे शुभग्रहाः भवन्ति चेदपि नष्टधनस्य लाभः भवति।

ततः नष्टद्रव्यस्य शीघ्रं पुनर्लाभः प्रतिपाद्यते। तद्यथा– प्रश्नलग्ने स्थितः बलिष्ठः चन्द्रः गुरुणा शुक्रेण वा वीक्षितः भवति तदा नष्टधनस्य अतिशीघ्रं पुनर्लाभः भवति। एकादशभावे कश्चन बली शुभग्रहः स्थितः भवति चेत् शीघ्रमेव नष्टद्रव्यस्य पुनर्लाभः उच्यते।

चोरितद्रव्यस्य स्थाननिर्णयार्थं प्रश्नलग्नस्य द्रेष्काणस्थितिः मुख्या भवति। तत्र हि प्रश्नलग्नं यदि प्रथमे द्रेष्काणे भवति तर्हि चोरितवस्तु द्वारसमीपे भवति। द्वितीये द्रेष्काणे ग्रहस्य अन्तः, तृतीये द्रेष्काणे च गृहस्य अन्तिमे भागे क्वचिद् भवति इति अवगन्तव्यम्। एतद्विषये 'ताजिकनीलकण्ठी' ग्रन्थोक्तं मतमपि उत्कृष्टं विद्यते, तन्मतेन चतुर्थस्थाने पृथ्वीतत्त्वराशेः स्थितिवशात् नष्टद्रव्यस्य भूमौ स्थितिः, चतुर्थस्थाने अग्नितत्त्वराशेः स्थितिवशात् अग्निसमीपस्थाने, जलतत्त्वराशेः स्थितिवशात् जलसमीपे, वायुतत्त्वराशेः स्थितिवशात् ऊर्ध्वस्थाने दोलायमाना स्थितिः भवति इति निर्णयः कर्तव्यः।

नष्टधनस्य दिङ्निर्णयविचारे प्रश्नलग्नात् केन्द्रस्थानेषु स्थितस्य बलिष्ठग्रहस्य दिग्वशात् नष्टधनस्य दिशायाः निर्णयः कर्तव्यः। केन्द्रस्थाने ग्रहाणाम् अभावे तत्रस्थराशिवशात् दिशायाः निर्णयः कर्तव्यः। नष्टद्रव्यं कियद्दूरम् अस्ति इति निर्णयार्थं प्रश्नलग्नस्य गतनवांशानां गणनया तावन्ति योजनानि दूरे नष्टद्रव्यम् अस्ति इति वक्तव्यम्। एवं नष्टद्रव्यस्य प्रश्न-सन्दर्भे चौर-स्थान-दिग्-मार्ग-पुनर्लाभादयो नैके विंचाराः अस्मिन् पाठे विवेचिताः सन्ति। यान् अधीत्य दैवज्ञः नष्टद्रव्य-विषयकप्रश्नानां प्रामाणिकम् उत्तरं निर्णेतुं शक्नोति।

१२.९ शब्दावली

१.	निजेन	–	आत्मीयेन, स्वबन्धुना वा।
२.	अङ्गगः	–	लग्ने स्थितः।
३.	खेचरैः	–	ग्रहैः (खे = आकाशे चरन्ति इति खेचराः)।
४.	लाभगः	–	एकादशभावे स्थितः।
५.	वीक्षितः	–	अवलोकितः।
६.	देवपूज्येन	–	गुरुग्रहेण।
७.	सत्वरं	–	अतिशीघ्रम्।
८.	अन्तिके	–	समीपे।
९.	आशा	–	दिक्।
१०.	ऋक्षात्	–	राशितः।
११.	अंशैः	–	नवांशैः।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१२.१० सन्दर्भग्रन्थः

१. **प्रश्नभूषणम्** - दैवज्ञजीवनाथझाप्रणीतम्, 'प्रेक्षा' 'सौम्या' संस्कृत-हिन्दीव्याख्योपेतम्, व्याख्याकारः = आचार्यः गुरुप्रसादगौडः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2004।

१२.११ सहायकग्रन्थाः

१. **ताजिकनीलकण्ठी** - आचार्यनीलकण्ठविरचिता, हिन्दीव्याख्याकारः - पं. सीतारामझा, चौखम्बा विद्याभवन, वाराणसी, 2007।

२. **प्रश्नमार्गः**, 'पाथेय' हिन्दीटीकासहितः, व्याख्याकारः - आचार्यः गुरुप्रसादगौडः चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2007।

३. **बृहज्जातकम्** - श्रीवराहमिहिररचितम्, भट्टोत्पलसंस्कृतव्याख्यासहितम्, हिन्दीव्याख्याकारः - केदारदत्तजोशी, मोतीलाल बनारसीदास, वाराणसी, 2005।

१२.१२ बोधप्रश्नोत्तराणि

१. अष्टमभावस्य ।

२. अष्टमभावेन ।

३. वृष-सिंह-वृश्चिक-कुम्भाः ।

४. पञ्चमः ।

५. नवांशः ।

६. गृहजनः ।

७. चन्द्रस्य ।

८. चोरितवस्तुनः पुनर्लाभः ।

९. मिथुन-सिंह-कन्या-तुला-वृश्चिक-कुम्भ-मीनाः शीर्षोदयाः ।

१०. अवश्यं भवति ।

११. गुरोः शुक्रस्य च ।

१२. एकादशभावे ।

१३. गृहस्य मध्यभागे ।

१४. शनिग्रहस्य ।

१५. पूर्वदिशा ।

१६. दक्षिणदिशायाः ।

१७. गतनवांशैः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१२.१३ अभ्यासप्रश्नाः

१. नष्टद्रव्य-प्रश्ननिर्णयः कैः भावैः कर्तव्यः।

२. चोरितद्रव्यप्रश्ने चौरनिर्णयविधिं लिखत।

३. नष्टधनस्य पुनर्लाभयोगान् वर्णयत।

४. प्रश्नभूषणग्रन्थोक्तं चोरितधनस्य स्थाननिर्णयं प्रतिपादयत।

५. नष्टधनस्य दिङ्मार्गयोः निर्णयं कुरुत।

—◆—

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनदृशा संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।

Kirtikant Sharma Collection, Najafgarh